# शाङ्करसिद्धान्तः

श्रीश्रीज्ञानानन्देन्द्रसरस्वतीस्वामिनः

प्रकाशकः
Y. V. SHANKARANARAYANA, B.E.,
Superintending Engineer,
HINDUSTAN SHIP YARD, CHIEF ENGINEER'S OFFICE
P. O GANDHIGRAM, VISHAKHAPATNAM-5
Pin. 530005 ( A. P. )

प्रथममुद्रणम् १००० प्रतयः, १९८१

14-9-1981

अस्य ग्रन्थस्य सर्वं स्वाम्यं प्रकाशकस्यैव

मूल्यम् पञ्च रूप्यकाणि

Price : Rs. 5-00

मुद्रणस्थानम् :

धनंजय बरलेबकरः

सुधामुद्रणमन्दिरम्,

उत्तरादिमठ कंपौंड, बसवनगुडि, बेंगलूर - ५६० ००४.

"अभिनवकर्णाटकशङ्कराचार्याः" इति सुप्रसिद्धेभ्यः

श्रीमत्परमहंसपरिव्राजकाचार्यवर्येभ्यः परमपूज्येभ्यः



5-1-1880 5-7-1975

श्रीश्रीसच्चिदानन्देन्द्रसरस्वतीसद्गुरुभ्यः

सप्रणामम् इमं "शङ्करसिद्धान्ताख्यं ग्रन्थं

समर्पितवानस्मि ।

—श्रीज्ञानानन्देन्द्रसरस्वतीस्वामी

शङ्करं शङ्कराचार्यमज्ञानध्वान्तभास्करम् ।
सच्चिदानन्दयोगीन्द्रं नमामीप्सितसिद्धये ॥
अध्यात्मरूपमज्ञानं येनेदं प्रकटीकृतम् ।
कृष्णस्वाम्यपराख्यं च ज्ञानिनं ज्ञानदं भजे ॥

इदं पुस्तकम्
अस्मद्गुरुवर्याणां
श्रीमत्परमहंसपरिव्राजकाचार्यवर्याणां
श्रीसच्चिदानन्देन्द्रसरस्वतीस्वामिनां
पादारविन्दयोः
समर्पयामि ।

–श्री ज्ञानानन्देन्द्रसरस्वती स्वामी
अध्यात्मप्रकाशकार्यालयः,
त्यागराजनगरम्

दुर्मतिनामसंवत्सरस्य
भाद्रपद शुक्ल पूर्णिमा
इन्दुवासरः
१४-९-१९८१
बेङ्गलूर

# पीठिका

इदानीं शङ्करभाष्यव्याख्यातॄणां पञ्चपादिकाकारादीनां प्रक्रियानुसारेणैव शङ्करसिद्धान्तः आसेतुहिमाचलपर्यन्तं प्रचलितो वर्तते । शङ्कराचार्योक्तप्रक्रियानुसारेण शङ्करसिद्धान्तः बहुषु स्थलेषु न लभ्यते ॥ अतोऽहं श्री श्री सच्चिदानन्देन्द्रसरस्वतीस्वामिभिः, श्री ॥ के. ए. कृष्णस्वामिअय्यर, महाशयैश्च प्रकाशितेन शुद्धशाङ्करप्रक्रियानुसारेण अल्पग्रन्थः आवश्यकः इति मत्वा शुद्धशाङ्करप्रक्रियानुसारेण इमम् अल्पग्रन्थं संस्कृतभाषायां कर्णाटकभाषायां आन्ध्रभाषायां च मुमुक्षूणां प्रयोजनाय रचितवानस्मि ॥

विचारदक्षाः निष्पक्षपाताः पण्डितप्रकाण्डाः इमम् अल्पग्रन्थं निष्पक्षपातदृष्ट्या विमृश्य आशीः कुर्वन्ति चेत् तेषां श्रेयःप्राप्त्यर्थं भगवन्तं सर्वज्ञं नारायणं स्मरामि ॥

बेंगलूर–५६००२८ —ज्ञानानन्देन्द्रसरस्वतीस्वामी

१४–९–१९८१

# अभिप्रायनिवेदनम्

विद्यालङ्कारः प्रा॥ मा. कृ. रामचन्द्र राव्

( राष्ट्रीय मनःस्वास्थ्य संशोधनकेन्द्रे, बेंगळूरु विश्वविद्यालये, अमेरिका-देशीय क्यालिफ़न् कालेज अध्ययनसंस्थायां च भूतपूर्वप्राध्यापकः,
चैतन्य-संशोधनविभागस्य अध्यक्षः,
आयुर्वेदीय विश्वकोशस्य प्रधानसंपादकः )

मुमुक्षुजनहितकाम्यया परमकारुणिकाः श्रीमदाचार्यपादाः चिरकालव्याकुलीकृतं वेदान्तार्थं याथातथ्येन विनिश्चित्य वेदान्तसत्संप्रदायसंरक्षणार्थं प्रस्थानत्रयभाष्याणि विरचय्यानुजगृहुः। किन्तु मध्येकालं अनधिगतभाष्याशयाः प्रतीपगत्यो व्याख्यानकाराः शङ्करपरिशोधितवेदान्तमार्गं असमीचीनवादैः कण्टकितमकुर्वन् । प्रसन्नगम्भीरोऽपि भाष्याशयः तेषां अग्रहणान्यथाग्रहणादिदोषैरध्वस्ताः । महदपवादपात्रमभूदिति भृशं निर्विण्णाः श्रीमत्सच्चिदानन्देन्द्रसरस्वतीसंयमिनः शुद्धशाङ्करसिद्धान्ताविष्करणे दृढव्रताः पञ्चशतमहानिबन्धैः वेदान्तसत्संप्रदायं विशदीचक्रुरिति सर्वेषां सुविदितमेव ॥

तेषामन्तेवासिनः पण्डितप्रकाण्डाः श्रीमज्ज्ञानानन्देन्द्रसरस्वतीस्वामिनः सदद्वैतसंप्रदायप्रकाशने तथैव दृढव्रताः स्वमहद्वार्धक्यमप्यगणय्य अविरताध्यापन–चिन्तन–प्रवचन–ग्रन्थरचनादिवाङ्मयतपसि नितरां बद्धादराः सन्तः जिज्ञासूननुपकुर्वन्तः सन्तीति उपनतं महदिदं सौभाग्यम् अस्माकम् ।

भगवता बादरायणेन, तथा संप्रदायविद्भिराचार्यैः गौडपाद-शङ्करसुरेश्वरादिभिश्च प्रणीतानि विवृतानि विस्तृतानि प्रमेयाणि सर्वेषां बहूपकाराणि भवन्त्विति स्वामिपादानामाशयः । तदर्थमेव तेषां सारस्वतव्यवसायः अन्याहतः कर्णाटाङ्ग्लगीर्वाणभाषासु प्रवर्तते ॥

अस्मिन् ग्रन्थे अधुना विरचिते समावेशितानि प्रकरणानि शुद्धशाङ्करसिद्धान्तं विवरीतुं प्रवृत्तानि । शङ्करसुरेश्वरपर्यन्तमेकरूप-प्रवृत्तस्याद्वैतसंप्रदायस्य तत्त्वतो निर्णयः श्रीस्वामिपादैः प्रतिपादितः । दृष्टस्य प्रपञ्चस्य मिथ्यात्वानुमाने समीचीना दृष्टिः, आत्मशब्दस्य तात्त्विकोऽर्थः प्रमाणव्यवहारे विचारणीयतात्पर्यः, मोक्षविचारः, साधन-सोपाननिरूपणम् , अवस्थात्रयविमर्शः—इत्येतानि विषयाण्यत्र प्राधान्येन संगृहीतानि । अवस्थात्रयविचारावसरे 'तत्तदनुभवानुसारेणैव विचार-णीया' इति नियममाश्रित्य चिन्ता प्रवर्तिता । आधुनिकविज्ञानदृष्ट्या अपि निर्दुष्टैव सा चिन्ता । फेनामेनालजीति अद्य प्रवृत्तायां प्रक्रियायां तामेव चिन्तामाश्रित्य प्रवर्तन्ते विज्ञानिनः । जाग्रदवस्था सर्वथा अबाधितेति न मन्यन्ते ते । पराग्भूतपदार्थजालमधिकृत्य जाग्रदवस्थायां संवादः अस्खलितरूपेण व्याप्तृत इत्यपि न स्वीकुर्वन्त्यधुना । यद्यपि 'यथा निद्रा यथापि स्वप्नव्यापारः तथैव जागरितव्यवहारः' इति न विश्वसन्ति, तथापि सर्वास्ववस्थास्वपि बहुशः सादृश्यं पश्यन्ति मनःशास्त्रिणः ॥

जीवस्य जीवत्वं, साक्ष्यनुभवः, मूलाविद्याख्या व्याख्यानकाराणां भ्रान्तिः, साधनसन्दर्भे प्राप्तिः प्रयोजनं, प्रमाणानां परिमितिः इत्यादिविचारः सुष्ठु प्रसृतः । रचयितारः स्वयं संप्रदायशरणा अपि, प्राक्तनकालीनपण्डिता अपि विचारशीलाः सारासारविवेचनविशारदाः, अद्यतनविज्ञानवादसरणीं विज्ञातवन्तः । तस्मात् सर्वत्रात्र नीरन्ध्रं शास्त्रचिन्ता प्रवर्तते । अपि च, सुलभया वाग्धोरण्या मनोरमया च शैल्या वेदान्तार्थं सुस्फुटं प्रकटीकुर्वन्ति । तेषां विषयोपपादनचातुरी अनितरसाधारणा अनन्यसुलभा ॥

श्रीमद्भिः श्रीचरणैरनुगृहीतग्रन्थालोडनेन विदुषां विद्यार्थिनामपि महदुपकारः उद्भविष्यतीति नात्र संशयः । सर्वेषां यथावदर्थग्रहणं शुद्धशाङ्करदर्शनान्तर्गतप्रमेयविषये निर्दुष्टा व्युत्पत्तिश्च भूयादिति ग्रन्थकाराणामाशयः सफलतां नीतः ॥

प्राक्विज्ञापनोपन्यासरूपेण ममापि वचनान्यत्रानुयोजयितुमवसरं दत्तवद्भ्यः श्रीचरणेभ्यः कार्तज्ञ्यमावेदयामि साञ्जलिबन्धः । मय्यनधिकारिणि महदनुग्रहभारः समापतितः इत्यलं प्रपञ्चेन ॥

बेङ्गलूरु —सालिग्रामाभिजनः कृष्णसूनुः रामचन्द्रायशर्मा
श्रावण शुद्ध पञ्चमी (S. K. Ramachandra Rao)
5-8-1981

# अभिप्रायनिवेदनम्

श्री ज्ञानानन्देन्द्रसरस्वतीस्वामिभिः विरचितं शङ्करसिद्धान्ताख्यम् अल्पग्रन्थं आमूलाग्रं पठित्वा विमृश्य मम अभिप्रायं आविष्करोमि ॥

१) अध्यास एव सर्वव्यवहाराणां कारणम् ।

२) अध्यासः अनादिरनन्तोऽपि सम्यग्ज्ञानेन बाध्यते ।

३) यावत्पर्यन्तं मनुष्यः प्रपञ्चान्तर्गतदेहेन्द्रियैः प्रपञ्चं पश्यति तावत्पर्यन्तं प्रपञ्चः सत्यभूतः इत्येव पश्यति । यदा देहेन्द्रियादीन् प्रपञ्चकुक्षिपतितान् कृत्वा स्वस्वरूपेण तिष्ठन् पश्यति तदा प्रपञ्चः अविद्यमान एव विद्यमान इव आभाति इति जानाति ॥

४) मूलाविद्याधिकारे द्वैतम् एव परमार्थभूतम् इति भवति । अद्वैतं तु न पश्यति ।

५) आत्मा प्रमाणसिद्धो न भवति । अयं स्वतःसिद्धः । प्रमाणानां सिद्धिः अनेनैव भवति । प्रमाता भूत्वा प्रमेयसिद्धये प्रमाणानि अपेक्षते ।

६) सृष्टिवाक्यानां सृष्टौ तात्पर्यं नास्ति । किन्तु तानि आत्माभिमुखीकरणार्थानि ।

७) अवस्थात्रयं तत्त्वदृशा अनुभवानुसारेणैव माप्यम् । सुषुप्त्यनुभवेन आत्मा अद्वितीयः असङ्गः सच्चिदानन्दस्वरूपः इति निर्णीयते ।

८) स्वरूपावस्थानमेव मोक्षः ।

९) निषिद्धकर्मानुष्ठानत्यागपूर्वकविहितकर्मानुष्ठानादीनि साधनसोपानानि ॥

इमे विषयाः सम्यग्विमृश्य लिखिताः । यः कोऽपि इमम् अल्पग्रन्थं पठेत् तस्य शाङ्करसिद्धान्तः यथावत् ज्ञातो भवति इति विश्वसिमि ॥

अध्यात्मविद्याप्रवीणः

बेङ्गलूर -- ५६००२८ | के. जि. सुब्बरायशर्मा

१५-९-१९८१ | अध्यात्मप्रकाशकार्यालयः

## कृतज्ञताविष्करणम्

मया लिखितानि हस्तपत्राणि सम्यक् संशोध्य भाषायां विषयेषु च विद्यमानानां दोषाणां अपनयनेन उपकुर्वतां बेङ्गळूरुपट्टणस्थिताध्यात्मप्रकाशग्रन्थकार्यालयपण्डितानां अध्यात्मविद्याप्रवीणानां श्रीमान् के. जि. सुब्बरायशर्मणां, वे. ब्र. श्री. मुदुगोण्ड वेंकटरामशास्त्रिभिः मया लिखित "मूलाविद्याभाष्यवार्तिकविरुद्धा" इति ग्रन्थविषये कृतम् समालोचनं मम तद्विमर्शनानि च विमृशतां होळेनरसीपुरस्थाध्यात्मप्रकाशकार्यालयपण्डितानां अध्यात्मविद्याप्रवीणानां वे. ब्र. श्री H. S. लक्ष्मीनरसिंहमूर्तिशर्मणां, सत्काले समीचीनतया मुद्रणं कृतवतां बेङ्गळूरुसुधामुद्रणमन्दिरस्वामिनां श्री. धनंजयाचार्य वरखेडकर महाशयानां च भगवान् सर्वज्ञः सर्वेश्वरः सर्वशक्तः नारायणः श्रेयांसि विदधातु इति नारायणं स्मरामि ॥

--ज्ञानानन्देन्द्रसरस्वती स्वामी

# शङ्करसिद्धान्तः

'सदेव सोम्य इदमग्र आसीत्', 'आत्मा वा इदमेक एव अग्र आसीत्' इत्यादिशास्त्रेण आत्मा एक एव अग्र आसीत् इति श्रूयते। 'नासतो विद्यते भावः' इति भगवदुक्त्यनुसारेण इदानीमपि असतः सदिव अवभासमानस्य अनात्मनः प्रपञ्चस्य अस्तित्वं नास्तीति सिध्यति । अत्र किञ्चिद्वक्तव्यमस्ति । प्रपञ्चः चक्षुरादिप्रमाणैः सिद्धः दृश्यते । तस्य अभावः कथं वक्तुं शक्यते ? अद्वितीयब्रह्मणः प्रमाणासिद्धत्वात् नास्ति तादृशं ब्रह्म इति वक्तुं शक्येत । प्रपञ्चस्य प्रमाणसिद्धत्वात् सः नास्तीति वक्तुमशक्यमिति कस्यचिन्मतिः स्यात् । तस्याः निवारणाय अयं विचारः प्रवर्तते ॥

पुरुषः नेत्राभ्यां खलु प्रपञ्चं पश्यति । नेत्रादीन्द्रियाणि कस्माज्जातानि ? प्रपञ्चाज्जातानि । छान्दोग्ये एवं प्रतिपादितम् । अन्नं अशितं त्रेधा विभज्यते यत्सारभूतं तन्मनः इत्यादि । अन्नाज्जातानि इन्द्रियाणि मनश्च । अन्नं च भौतिकात् जातम् । भौतिकानि भूतेभ्यो जातानि । भूतान्येव खलु प्रपञ्चः । तथा च इन्द्रियाणि मनश्च परम्परया प्रपञ्चाज्जातानि इति सिद्धम् । प्रपञ्चाज्जातानि इन्द्रियाणि मनश्च प्रपञ्चः नास्तीति कथं वदेयुः ? 'मम माता वन्ध्या' इतिवाक्यसमं भवेत् । अतः यावत्पर्यन्तं जनाः इन्द्रियैः मनसा च प्रपञ्चं पश्यन्ति तावत्पर्यन्तं प्रपञ्चः परमार्थतः अस्त्येवेति जानन्ति । इन्द्रियाणि जडानि, आत्मा

शुद्धचेतनः निष्क्रियश्च तयोरन्योन्याध्यासं विना 'पश्यामि' 'शृणोमि' इत्यादि वक्तुं न शक्यते। अतः अध्यस्तात्मनैव दर्शनं कृतम् । अध्यस्तात्मना यद् दृष्टं श्रुतं तत् न तथा भवितुमर्हति ॥ ये पुनः शङ्कराचार्यादयः देहेन्द्रियाद्यध्यासं सम्यग्ज्ञानेन बाधित्वा आत्मस्वरूपेण स्थित्वा पश्यन्ति स्म । केवलात्मानमेव अपश्यन् । अनात्मप्रपञ्चं नापश्यन् । अतः अध्यस्तात्मभिः यत्प्रपञ्चदर्शनं न तत् प्रमाणसिद्धम् इति ज्ञात्वा तद्विहाय अनध्यस्तात्मनां ज्ञानिनां दर्शनमेव प्रमाणमिति कृत्वा सृष्टेः पूर्वं यः आत्मा एक एव आसीत् इदानीमपि आत्मा एक एव स अखण्डः अद्वितीयः वर्तते इति अवदन् ॥ 'नासतो विद्यते भावः' इति गीतावाक्योक्तप्रकारेण सृष्टेः पूर्वं अविद्यमानस्य प्रपञ्चस्य असतः इदानीं सत्त्वं कथं भवेत् ! न कथंचित् भवेत् इति निर्णयं चक्रुः ॥

अध्यस्तात्मानः दर्शनकाराः वा भवन्तु सामान्यजनाः वा भवन्तु तेषां दर्शनं न निर्दुष्टं भवति ॥ अध्यासरूपदोषविशिष्टत्वात्तस्य । यथा तिमिरोपहतनयनः चन्द्रद्वयं वा चन्द्रपञ्चकं वा पश्यति । तत्प्रमाणभूतमिति सर्वैः अङ्गीक्रियते किम् ! नाङ्गीक्रियते । कुतः ! तिमिरोपहतनयनत्वात्तस्य । तिमिरदोषवर्जितपुरुषेण एक एव चन्द्रः दृश्यते । तदेव प्रमाणत्वेन अङ्गीक्रियते । कुतः ! तिमिरदोषवर्जितनयनत्वात्तस्य । तथैव अध्यासरूपदोषवर्जितानां यज्ज्ञानं तत्सम्यग्ज्ञानत्वेन अङ्गीक्रियते । अध्यासरूपदोषदुष्टानां ज्ञानम् अप्रमाणभूतमिति नाङ्गीक्रियते । अध्यासरूपदोषदुष्टैः प्रपञ्चः दृश्यते । तस्य दर्शनं प्रमाणत्वेन नाङ्गीक्रियते, दोषदुष्टत्वात् । अध्यासरूपदोषवर्जितैर्यदेकत्वज्ञानम् अनुभूयते, तदेव

प्रमाणमित्यङ्गीक्रियते । तस्मादात्मैकत्वज्ञानमेव सम्यग्ज्ञानमिति सिद्धम् ॥

## [1] अयमात्मा ब्रह्म

अयम् इति शब्दः अत्यन्तसन्निकृष्टवस्तुबोधकः । अविद्याकल्पितदेहेन्द्रियादिकार्यकरणसङ्घातव्यतिरिक्तः । तेभ्योऽपि सन्निकृष्टः शुद्धः स्वस्वरूपावस्थः उच्यते । स एव देहेन्द्रियादिकार्यकरणसङ्घातोपाधिविशिष्टः अहंप्रत्ययगम्यः जीव इत्युपचर्यते ॥

आत्मशब्दार्थः—

> यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह ।
> यच्चास्य सन्ततो भावः तस्मादात्मेति गीयते ॥

आप्नोति = सर्वव्यापकः इत्यर्थः ।

यदि जीवः प्रपञ्चश्च आत्मनो व्यतिरिक्तौ स्यातां तदा आत्मा जीवरूपेण प्रपञ्चरूपेण न वर्तते इति सर्वव्यापकत्वम् आत्मनः न सम्भवति । जीवप्रपञ्चौ आत्मरूपौ चेत् तदा आत्मनः सर्वव्यापकत्वं सम्भवति ॥ यदादत्ते = सर्वस्यापि आत्मन्येव स्थितत्वे एव सर्वस्य आदानं सम्भवति । यच्चात्ति विषयानिह = यत् यस्माज्जायते, तत् तस्मिन्नेव प्रलीयते । अतः आत्मनः एव सर्वस्य जातत्वे आत्मा सर्वं स्वस्मिन्नेव उपसंहरति इति अत्ति इति वक्तुं शक्यते ॥ तस्मादात्मा नाम निरुपाधिकं स्वरूपस्थम् अद्वितीयं ब्रह्मैव ।

---

1) सू. भा. १-१-१ अयमात्मा ब्रह्म

1) मा. १-२ अयमात्मा ब्रह्म

यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह ।
यच्चास्य सन्ततो भावः तस्मादात्मेति कथ्यते ॥

इत्यनेन आत्मनः अव्यभिचारित्वं प्रतिपाद्यते । आत्मा एक एव अवस्थात्रयेऽपि अव्यभिचरितत्वेन वर्तते । आत्मा नास्तीति यो वक्ता स एव आत्मा । अतः आत्मनः अस्तित्वं निषेद्धुं न केनापि शक्यते । जाग्रत्प्रपञ्चः स्वप्नसुषुप्त्योः व्यभिचरति । स्वप्नप्रपञ्चः जाग्रत्सुषुप्त्योः व्यभिचरति । आत्मा तु अवस्थात्रयेऽपि एकरूपेणैव वर्तते इति सः अव्यभिचारी । आत्मा तु अवस्थात्रयेऽपि स्वेन पारमार्थिकरूपेण वर्तते इति सर्वमपि ब्रह्मलक्षणम् आत्मन्येव वर्तते इतिकृत्वा अयम् आत्मा ब्रह्म इत्युक्तं इति ज्ञेयम् ॥ बहवः मूढाः अविवेकिनः अहंप्रत्ययगम्यमेव आत्मानम् आत्मेति अद्वैतिनः वदन्ति इति विदित्वा 'अद्वैतिनः ईश्वरः अहमिति वदन्ति इति' हास्यं कुर्वन्ति ॥ तैः आत्मशब्दार्थः न ज्ञातः ॥ अतो मूढाः अविवेकिनः इति अत्र मया प्रयोगः कृतः ॥ अद्वैतसिद्धान्ते आत्मब्रह्मपदे समानार्थके तत्त्वप्रतिपादनपरे इति बोद्धव्यम् ॥ अत एव 'अयम् आत्मा ब्रह्म' इति मया उक्तम् ॥ भाष्यकारैरपि 'आत्मा च ब्रह्म इत्युक्तम् प्रथमसूत्रभाष्ये ॥ अहंप्रत्ययगम्यस्य अयम् आत्मा साक्षी । अयं साक्षी अन्यस्तात्मना ज्ञातुं न शक्यः । साक्षिस्वरूपः आत्मा ब्रह्म इत्युच्यते । अहंप्रत्ययगम्यस्तु जीव इत्युच्यते ॥ तस्मात् अहंप्रत्ययगम्यस्य यः साक्षी स एव अत्र आत्मा इत्युच्यते ॥ साक्षिस्वरूप एव आत्मा यः स आत्मा ब्रह्म इत्युच्यते इति ज्ञेयम् ॥ भाष्यकारैरप्येवमुक्तम् ॥

न हि अहंप्रत्ययविषयकर्तृव्यतिरेकेण तत्साक्षी सर्वभूतस्थः समः एकः कूटस्थनित्यः पुरुषो विधिकाण्डे सर्वसमये वा केनचिदधिगतः सर्वस्यात्मा। अतः न स केनचित्प्रत्याख्यातुं शक्यो विधिशेषत्वं वा नेतुम्। आत्मत्वादेव च सर्वेषां न हेयो नाप्युपादेयः। सर्वं हि विनश्यद्विकारजातं पुरुषान्तं विनश्यति। पुरुषो विनाशहेत्वभावात् अविनाशी, विक्रियाहेत्वभावाच्च कूटस्थनित्यः। अत एव नित्यशुद्धबुद्धमुक्तस्वभावः॥

(सू. भा. १-१-४)

पद्मपादिकाकाराः व्याख्यातारः भाष्यविरुद्धां द्वैतापादिकां मूलाविद्यां भाष्योक्तत्वेन भाष्ये प्रवेशयामासुः। व्याख्यातृणामभिप्रायानुसरणम् बहुकालादागतम्। विमर्शनम् अदर्शनं गतम्। अतः सर्वैः पण्डितैः व्याख्यातृभिश्च विचारं विना मूलाविद्या आदृता। पद्मपादिकायां मूलाविद्यालक्षणं एवमुक्तम्॥

"श्रुतिस्मृतिपुराणेषु येयं नामरूपबीजम्, अव्याकृतम्, अविद्या, माया, प्रकृतिः, आवरणम् इत्यादिशब्दैः प्रतिपादिता ब्रह्माश्रया ब्रह्मविषया अध्यासादिसर्वप्रपञ्चस्य उपादानकारणीभूता सदसद्भिन्ना ज्ञाननाश्या माया अविद्येति नाम्ना विदिता नामरूपबीजभूता अनादिभूता मूलाविद्या अनिर्वचनीया भावरूपा इयमेव जगदुपादानकारणीभूता" इत्यादिः॥

( पद्मपादिका २० )

अनादिभूतभावरूपाज्ञानविषयीभावस्य सत्, आत्मा, ब्रह्मेत्यादि-पदैः उक्तं ब्रह्म ज्ञानमासीदिति श्रुत्युक्तेः बाधस्स्यात्। द्वैतापत्तिश्च स्यात्। निर्वचनीयं वा भवतु, अनिर्वचनीयं वा भवतु वस्तु ज्ञानेन न बाध्यते। अतः द्वैतापत्तिः स्यात्। भाष्यकारैः अध्यासात् प्राक्प्रोक्तापि दर्शयित्वा ज्ञानेन अध्यासे बाधिते प्राक्तोऽपि बाधितो भवति केवलं ब्रह्म अवशि-ष्यते इति अद्वैतं प्रसाधितं, तस्माद् भातीति सुधीभिर्ज्ञेयम्॥ न केवलं विज्ञानैः मठाधिपतयोऽपि यथाकथञ्चित् मूलाविद्यां रक्षितुमेव प्रयतन्ते। पूर्वैरपि रक्षिता अस्माभिरपि इयं रक्षितव्या इति मन्यन्ते। तथापि सुधीभिर्विचार्य इयं भाष्यविरुद्धा द्वैतापादिकेति ज्ञात्वा दूरत एव त्यक्तव्येति ते सप्रश्रयं सम्प्रार्थ्यन्ते॥

श्रीशङ्कराचार्यस्तु— एक एव आत्मा शरीराद्युपाधिभेदेन बहुधा ज्ञायते। आत्मनः परमार्थस्वरूपमेव ब्रह्म। यावत्पर्यन्तम् उपाधिभूतो देहादिः स्वयमेवेति मन्यते तावत्पर्यन्तं तस्य निजस्वरूपम् तेन ज्ञातुं न शक्यते। यदा तु शरीरेन्द्रियादिकम् अस्माभिः भुक्तस्य अन्नस्य परिणामभूतं अचेतनं सावयवं कथम् अहं स्याम् इति विचारः मनसि प्रादुर्भवति, तदैव नाहं देहः, नान्तःकरणम्, न मनः, नेन्द्रियाणि इति आत्मानात्मनोः विवेकः क्रमेण जायते तदा तस्य निजं स्वरूपं सच्चिदानन्दस्वरूपमेव, परं ब्रह्म अहमेव अस्मि इत्यनुभवं लभते इत्यवदत्। अत एव शङ्कराचार्यास्तु— देहाद्युपाधिभूतम् अनृतमेव। आत्मा एक एव परमार्थसत्यभूतः, अन्यत् सर्वमनृतं देहात्मनोरेकत्वज्ञानं भ्रान्तिरेव, सम्यग्ज्ञानाज्ञानेन एषा भ्रान्तिर्बाध्या। सम्यग्ज्ञानेन बाधिते तु मिथ्या-

ज्ञाने अहं नित्यशुद्धबुद्धमुक्तस्वभावः इत्यनुभवः जायते ॥ एतादृश-ज्ञानस्यापि बाधकत्वाशङ्का नैव सम्भवति । बाधकस्य अन्यस्य अभावात् । तस्य स्वरूपेण विद्यमानत्वाच्च । तादृशात्मानम् इन्द्रियैः विषयीकर्तुं न शक्यते । अविषयत्वादात्मनः । सः विषयी, विषयिणं विषयरूपेण परिणेतुम् अशक्यः । तस्मात् स्वयमेव आत्मा भूत्वा आत्मनि आत्मानं पश्येत्— इत्यवोचन् ॥

आत्मा प्रमाणगम्यो न भवति, प्रमाणेभ्यः पूर्वसिद्धः आत्मा । आत्मा, प्रमाता, प्रमाणं, प्रमेयः इति क्रमः । आत्मा देहाध्यासेन प्रमाता भूत्वा प्रमाणानि परिगृह्य प्रमेयं पश्यति । आत्मा तु अप्रमेयः । श्रुतयस्तु अनात्मतिरस्कारेणैव आत्मानं बोधयन्ति । न तु विषयीकरणेन बोधयन्ति । अविषयत्वात् आत्मनः । सर्वे दर्शनकाराः इन्द्रियद्वारेणैव प्रपञ्चस्य स्वरूपं निर्णेतुं प्रवृत्ताः । इन्द्रियाणि मनश्च अस्माभिर्भुक्तस्य अन्नस्य सारभूतानि । अन्नं भौतिकमित्येतत्प्रत्यक्षत एव दृश्यते । भौतिकानि भूतेभ्यः उत्पन्नानि । भूतान्येव प्रपञ्चः तस्मात्परम्परया प्रपञ्चाज्जातानि इन्द्रियाणि मनश्च प्रपञ्चः नास्ति इति वक्तुं न शक्नुवन्ति । 'मम माता वन्ध्या' इति वक्तुं यथा न शक्यते, तथैव प्रपञ्चाज्जातानि इन्द्रियाणि मनश्च 'प्रपञ्चो नास्ति' इति वक्तुं न शक्नुवन्ति । तज्जन्यत्वात्तेषाम् । तस्मात् प्रपञ्चस्य सतत्त्वं निर्धारयितुं प्रवृत्तः पुरुषः प्रथमतः आत्मत्वेन परिगृहीतानि देहेन्द्रियाणि मनश्च आत्मनः बहिर्भूतानि कार्याणि । यदा आत्मा स्वस्वरूपेण तिष्ठति तदा अनात्मभूतं प्रपञ्चं नैव पश्यति । केवलम् आत्मानम् अद्वितीयं पश्यति तदा प्रपञ्चस्यैव

अभावात् प्रपञ्चस्य कारणप्रश्नोऽपि नैव सम्भवति । केवलः आत्मा निस्सङ्गः अद्वितीयः अवशिष्यते ॥

देहादिषु अनात्मसु अहंमतिः भ्रान्तिः खलु । अतः देहेन्द्रियादयः तेषु च अहंमतिः एककाले भवन्ति । यदा देहादिषु अहंमतिः (अध्यासः) तदैव प्रपञ्चं सः पश्यति । यदा अध्यासो नास्ति सुषुप्तिसमाध्योः तदा प्रपञ्चं नैव पश्यति । तस्मात् अयं प्रपञ्चः अध्यासादुत्पन्नः इति वक्तुं शक्यते । अध्यासस्य किं कारणम् ? इति चेत् अध्यासस्य तत्त्वज्ञानाभाव एव प्रतिपत्तिक्रमेण कारणम् । यथा मृत् घटस्य कारणं तथा तत्त्वज्ञानाभावः अन्यथाज्ञानस्य कारणं न भवति । तत्त्वज्ञानाभावे सति अन्यथाज्ञानं संभवति यथा रज्ज्वज्ञाने एव सर्पज्ञानं संभवति तद्वत् तत्त्वज्ञानाभाव एव अन्यथाज्ञानरूपोऽध्यासस्संभवतीति कृत्वा तत्त्वज्ञानं अध्यासस्य कारणमित्युच्यते । आत्मानात्मनोरितरेतराज्ञानरूपस्य अध्यासस्य उपादानकारणं न संभवति । कालदेशकार्यकारणव्यवहारः अध्यासानन्तरं संभवति । कार्यनियतपूर्वकालवृत्ति यत् तत्कारणं भवति । अध्यासात्पूर्वं काल एव नास्ति । तस्मात् अध्यासस्य उपादानकारणं न संभवति । अत एव भाष्यकारैः । 'तथाप्यन्योन्यस्मिन् अन्योन्यात्मकतामध्यस्य इतरेतराविवेकेन' इत्युक्तम् ॥ सर्वानुभवगम्योऽध्यासः भाष्यकारैः प्रतिपादितः 'नहि दृष्टे अनुपपन्नं नाम' इत्युक्तम् । ( बृ. भा. ४-१-२ ) ( बृह. १-४-१२ ) यदुक्तं पञ्चपादिकाकारैः 'मूलाविद्याकार्यं अध्यासः' इति तदनुभवविरुद्धम् । 'मूलाविद्याकार्यं अध्यासः' इति वक्तुं अध्यस्तरूपेण भाव्यम् अध्यास

विना न कोऽपि व्यवहारस्सम्भवति । भाष्यकारैः **"तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः । सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि "** इत्युक्तम् (अध्यासभाष्ये) । तस्मादध्यासात्पूर्वं ब्रह्मव्यतिरिक्तस्य अन्यस्य यस्यकस्यचिदभावात् अध्यासस्य उपादानकारणं मूलाविद्येति पद्मपादिकाकारवचनम् अनुभवविरुद्धं भाष्यविरुद्धं च । आत्मानात्मनोरितरेतराध्यासः अनुभवैकगम्य इति च सिद्धम् । भाष्यकाराः गीताभाष्ये (१३-२६) "यावत्सञ्जायते किञ्चित् सत्त्वं स्थावरजङ्गमम् । क्षेत्रक्षेत्रज्ञसंयोगात् तद्विद्धि भरतर्षभ ॥ " इतिश्लोकव्याख्यानावसरे एवं लिखन्ति– " कः पुनरयं संयोगो नाम ? न तावत् रज्ज्वा इव घटस्य अवयवसंश्लेषद्वारकः सम्बन्धविशेषः संयोगः क्षेत्रेण क्षेत्रज्ञस्य सम्भवति, आकाशवत् निरवयवत्वात् । नापि समवायलक्षणः, तन्तुपटयोरिव क्षेत्रक्षेत्रज्ञयोः इतरेतरकार्यकारणभावानभ्युपगमात् इति । उच्यते । **क्षेत्रक्षेत्रज्ञयोः विषयविषयिणोः भिन्नस्वभावयोः इतरेतरतद्धर्माध्यासलक्षणः रज्जुशुक्तिकादीनां तद्विवेकविज्ञानाभावात् अध्यारोपितसर्परजतादिसंयोगवत् । सोऽयं अध्यासरूपः क्षेत्रक्षेत्रज्ञसंयोगः मिथ्याज्ञानलक्षणः ॥** क्षेत्रक्षेत्रज्ञयोः इतरेतरविवेकाग्रहणाभावनिबन्धनः इति अध्यासात् जगदुत्पत्तिः भाष्यकारैः कथिता । पूर्वं ब्रह्मणः जगदुत्पत्तिरित्युक्तम् , इदानीम् अध्यासादुत्पत्तिरुच्यते । अन्यत्र मायायाः जगदुत्पत्तिः उक्ता । एवं भिन्नभिन्नस्थलेषु जगतः भिन्नभिन्नकारणत्वप्रतिपादनात् उत्पत्तिबोधकवाक्येषु प्रामाण्यं हीयेत इति चेत्; मैवं मंस्थाः ।

ब्रह्मणः जगदुत्पद्यते इत्युक्तौ ब्रह्मणि आत्मभूते अध्यासेन जगत् कल्पितम् इत्येव अर्थः । कुतः ? ब्रह्मणः निरवयवत्वात् ॥ अध्यासकल्पितत्वाच्च अध्यास एव कारणम् इति वक्तुं शक्यते । अतो न विरोधः ॥

अध्यासे सति जगदपि वर्तते जाग्रत्स्वप्नयोः । अध्यासाभावे नास्त्येव कार्यं जगत् सुषुप्तौ इत्यनुभवसिद्धत्वात् अध्यासकार्यं जगत् इत्यत्र न कोऽपि दोषः प्राप्नोति[1] । सर्वे प्रमाणप्रमेयव्यवहाराः अध्यासपुरस्सरा एव । **देहेन्द्रियादिषु अहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तिः । इन्द्रियाण्यनुपादाय प्रमाणप्रवृत्तिर्न भवति ।** अहं पश्यामि इत्यत्र केवलः आत्मा न पश्यति । तथैव केवलं चक्षुः जडभूतं न पश्यति । अन्योन्यस्मिन् अन्योन्यात्मकत्वम् अध्यस्य अहं पश्यामि इति व्यवहारः सम्भवति । आत्मचक्षुषोरैक्यज्ञानं भ्रान्तिरेव । भ्रान्तेन दृष्टं सम्यग्ज्ञानं न भवति । अत एवोक्तम् **प्रात्यक्षादिप्रमाणानि शास्त्राणि च अविद्वद्विषयाणि इति ॥**

अद्वैतिना तु कथम् आत्मैकत्वसिद्धिः इति चेत् । श्रूयताम् । आत्मा न प्रमाणसिद्धः । किन्तु स्वतस्सिद्धः । आत्मा प्रमाता भूत्वा प्रमेयग्रहणाय प्रमाणानि गृह्णाति, न तु प्रमातृसिद्ध्यै नापि परमार्थसिद्ध्यै इति पूर्वमेव प्रतिपादितम् । तर्हि शास्त्रयोनित्वाधिकरणे **ब्रह्मणः** यथावत्स्वरूपाधिगमे शास्त्रमेव प्रमाणमित्युक्तम् । कथं शास्त्रप्रमाणकत्वं ब्रह्मणः उच्यते ? इति चेत् शास्त्रमात्मनि अविद्याकल्पितभेद-

---

[1] गी. भा. १३-२६ भाष्यात्सायत्तं तर्कम् ।

निवृत्तिद्वारा प्रमाणं भवति । न हि इदंतया शास्त्रं ब्रह्म निर्दिशति । अविषयत्वात् ब्रह्मणः । यद्यपि तर्कशास्त्रप्रणेता गौतममुनिः "ओम् नमः प्रमाणाय" इति सर्वसिद्धिकारणं प्रमाणमिति कृत्वा अवोचत् । तथापि सः आत्मनः प्रमाणगम्यत्वं नास्तीति न विजज्ञौ । सर्वप्रमेय-सिद्धेः कारणं प्रमाणम् इति वक्तव्यम् । आत्मा स्वतःसिद्धः प्रमाता भूत्वा प्रमाणानि गृहीत्वा प्रमेयसिद्धिं वदति । आत्मा न प्रमेयः । स्वयम् आत्मानम् अन्यान् विषयानपि जानाति । विषयस्तु जडः स्वात्मानमेव न विजानाति । किम् अन्यान् जानाति ? न जानाति । तस्य सिद्धिः आत्मनैव स्यात् । प्रमेयसिद्ध्यर्थान्येव प्रमाणानि, न आत्म-सिद्ध्यर्थानि इति सिद्धम् । प्रमाणसिद्धिः आत्मनैव भवति ॥

आत्मना 'इदं जलं' 'इयं भूमिः' इति गृहीते तयोस्सिद्धिः दृष्टा । अतः जलादयः विषयाः स्वात्मानं वा अन्यान् वा ज्ञातुम् अशक्ताः ? अत एव ते जडाः । तथा इयमपि मूलाविद्या स्वयमेव स्वात्मानं साधयितुम् अशक्ता । अध्यस्तात्मना इयं साध्या । नो चेत् सा न सिद्ध्यति । पद्मपादिकाकारान् विवरणकारादीन् व्याख्यातृन् मुक्त्वा अन्यैः पूर्वैः शङ्कराचार्यादिभिः सा न साधिता, साध-यितुम् अयुक्ता च । पद्मपादिकाकारैः इयं मूलाविद्या ज्ञानविरोधिनी इति कल्पितायां सत्याम् इयं विरोधिनी भवति किम् ? न भवति । यथा तमःप्रकाशयोर्विरोधः सर्वैरपि अनुभूयते, तथा मूलाविद्याज्ञानयोः विरोधः सर्वैर्नानुभूयते । तस्मात्तयोर्विरोधः नैव सम्भवति । भाष्यकारैः "ज्ञानं तु ज्ञापकं, न कारकमित्युक्तम् । ज्ञानं तु न वस्तुतुन्त्र"

इत्यपि बृहदारण्यकभाष्ये उक्तम् । स्थितायाः मूलाविद्यायाः ज्ञानबाध्यत्वाभावात् द्वैतापत्तिर्दुर्निवारा ॥ इयं कल्पिता इति वक्तुं न शक्यते । कुत इति चेत् कल्पनाया एव उपादानकारणत्वेनाङ्गीकारात् । इयं मूलाविद्याप्रक्रिया यथा यथा विचार्यते तथा तथा सिकताकूपवद्विशीर्यते । अद्वैतम् आत्मानम् द्रष्टुकामैर्मुमुक्षुभिः इयं दूरतः परित्यक्ता भवेत् इति तान् प्रार्थये । अध्यासस्तु न तथा । अयं सर्वैरनुभूयते तस्य सम्यग्ज्ञानविरोधोऽपि दृष्टः । 'इयं शुक्तिः' इति सम्यग्ज्ञाने जाते 'इदं रजतम्' इति मिथ्याज्ञानं नैव स्थातुं शक्नोति । तथैव 'अहं ब्रह्मास्मीति' सम्यग्ज्ञाने जाते 'अहं मनुष्यः' इति मिथ्याज्ञानं नैव स्थातुं शक्नोति । मिथ्याज्ञानपुरस्सरा एव सर्वे व्यवहाराः इति मत्वा सम्यग्ज्ञानेन मिथ्याज्ञानं बाधित्वा सर्वव्यवहारान् दूरतो निरस्य ब्रह्मभूताः सुखिनो भवन्तु मुमुक्षवः इति तान् प्रार्थयामि । तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते । तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः । इति विद्याविद्ययोर्लक्षणमुक्तम् ।

देहाध्यासेन यदा अहमिति मन्यते तदैव देवः भिन्नो भवति । यथा निरवयवस्य अखण्डस्य आकाशस्य घटाकाशः इति परिच्छित्तिर्भवति । तदैव महाकाशः भिन्नो भवति । अपरिच्छिन्नाकाशः तृतीयो भवति । तथैव जीवः देवः परमार्थतत्त्वमिति त्रिधा भेदो भवति । ज्ञानिदृष्ट्या तु एक एव आत्मा अपरिच्छिन्नः सर्वव्यापकः अखण्डश्च भवति ॥

**एको देवस्सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।**
**कर्माध्यक्षः सर्वभूताधिवासस्साक्षी चेता केवलो निर्गुणश्च इति ।**

मन्त्रस्य अर्थः अनुभवारूढो भवति ॥

यदा अध्यासेन आत्मा आत्मानं जीव इति मन्यते तदैव प्रपञ्चं पश्यति । तदैव प्रपञ्चस्य उपादानकारणं किम् इति विचारयति । जीवः स्वयमेव अध्यस्तस्सन् जगत्कारणं किमिति विचारयति । सांख्याः त्रिगुणात्मकं प्रधानं जगदुपादानकारणमिति मन्यन्ते । तथैव योगिनश्च । नैयायिकवैशेषिकौ परमाणुं जगदुपादानकारणं मन्येते । पूर्वमीमांसकाश्च प्रकृतिम् उपादानकारणं मन्यन्ते । परिणामप्रक्रियामाश्रिताः विशिष्टाद्वैतिनः सूक्ष्मम् अचितं जगतः उपादानकारणं मन्यन्ते । माध्वद्वैतिनः प्रकृतिं जगदुपादानकारणं मन्यन्ते । पद्मपादिकाकारादयः शाङ्करभाष्यव्याख्यातारः त्रिगुणात्मिकाम् अनादिभूताम् अनिर्वचनीयवस्तुभूतां मूलाविद्यां जगदुपादानकारणं मन्वते । एवं महद्भिः बहुधा जगदुपादानकारणं वदन्ति । यदि तैः कारणं दृष्टं स्यात् बहुधा वर्णयितुम् अशक्यं स्यात् । एकप्रकारेणैव वक्तव्यं स्यात् । नानाप्रकारेण वदन्ति । अतः नैकस्यापि निर्णयः समीचीनः इति आपतति । यतः ते सर्वे अध्यस्तात्मरूपेणैव विचारं कुर्वन्ति । शङ्कराचार्यास्तु अध्यासमेव जगदुपादानकारणं वदन्ति । न केवलं वदन्ति, किन्तु प्रदर्शयन्ति च । तद्यथा– यदा अध्यासः वर्तते तदैव जगद् दृश्यते । यथा जाग्रत्स्वप्नयोः । जाग्रत्स्वप्नयोः देहेन्द्रियादिषु अहंममाभिमानरूपः अध्यासः वर्तते, प्रपञ्चोऽपि

वर्तते । सुषुप्तौ अध्यासो नास्ति, प्रपञ्चोऽपि नास्ति । तस्मात् यत्सत्त्वे यत्सत्त्वं यदसत्त्वे यदसत्त्वं तत्तस्य कार्यम् इति न्यायतः अध्यासं जगतः उपादानकारणमिति वदन्ति । किञ्च अविद्यया कल्पिता माया जगदुपादा-नकारणमित्यपि शंकराचार्याः वदन्ति । अत्र अर्थभेदो नास्ति । मायायाः अवस्तुत्वात्, अविद्याकल्पितत्वाच्च । जगतः ब्रह्म कारणमित्यत्र ब्रह्मणः अद्वयत्वात् चेतनत्वात् निरवयवत्वाच्च परिणाम्युपादानकारणं न भवति । ब्रह्मण्येव अविद्यया कल्पितं जगत् । तस्मात्कल्पनाधिष्ठानभूतं ब्रह्म । ब्रह्म कारणमित्यस्य ब्रह्मणि अविद्यया जगत्कल्पितम् इत्येवार्थः । अत्रापि अविद्याकारणत्वं वर्तत एव । अविद्याकारणत्वं सर्वत्र अनुस्यूतं वर्तते इति मत्वा अविद्या कारणमित्युच्यते । जगतः अविद्यया ब्रह्मणि कल्पितत्वं कथम्? इति चेत् उच्यते । यदा ब्रह्म देहेन्द्रियादिरूपो-पाधिविशिष्टं भवति तदा जीव इत्युपचर्यते । तदैव जगत्पश्यति यदा उपाधिं विहाय स्वस्वरूपेण तिष्ठन् पश्यति । तदा जगन्न पश्यति । अतः जगत् न परमार्थभूतम्, किं तु ब्रह्मण्येव अविद्यया कल्पितमिति निश्चीयते । कल्पितस्य जगतः आस्पदभूतस्य ब्रह्मणः अभावे कल्पना-नुपपत्तेः ब्रह्मणि अविद्याकल्पितं जगत् इति निर्धार्यते । अतः जग-त्कारणं ब्रह्म इत्युक्ते, अध्यासः कारणम् इत्युक्ते, माया जगत्कारणम् इति उक्तेऽपि सर्वत्र अध्यासमूलकत्वस्य विद्यमानत्वात् अध्यास एव जगत्का-रणम् इत्यत्र निर्णयावः ॥

# प्रमाणविचारः

भाष्यकाराः ( सू भा. १।१ २ ) "न केवलं श्रुत्यादय एव इह प्रमाणम्। किन्तु श्रुत्यादयः अनुभवादयश्च यथासम्भवम् इह प्रमाणम्" इति प्रकटयामासुः । अत्र विविच्य प्रत्येतव्यम् । उपासनाफलं कर्मफलवत् देहपातानन्तरमेव प्राप्तव्यम् । तस्मात् उपासनाफलविषये श्रुत्यादयः एव प्रमाणम् । श्रुत्यादयः इति आदिशब्देन स्मृतिपुराणानि सिद्धपुरुषप्रोक्तानि वाक्यानि च गृह्यन्ते । ब्रह्मविषये सार्वत्रिकानुभव एव प्रमाणम् । अनुभवशब्देन न प्रमात्रनुभवः गृह्यते, अनेकरूपत्वात् प्रमातुः अविद्यावत्त्वाच्च । प्रमाता अविद्यावानेव, देहेन्द्रियादिषु अहंममाभिमानविशिष्टत्वात् । तस्मात् देहेन्द्रियादिषु अहंममाभिमानरूपाध्यासवर्जितः साक्षी यः तद्रूपेण स्थितस्य अनुभवः अनुभव इति गृह्यते । तस्य साक्षिणः अनुभवः एव प्रमाणत्वेन इह गृह्यते । एकरूपत्वात् अध्यासरूपदोषरहितत्वाच्च । साक्षिणः एकत्वात् साध्यनुभवोऽपि एकरूप एव भवति । स एव साध्यनुभवः अनुभवपदेन अत्र गृह्यते । एतादृशानुभवस्य प्रमाणत्वेन न केनापि दर्शनकारेण प्रतिपादितम् । साक्षिस्वरूपेणावस्थितदशङ्कराचार्यस्तु तादृशानुभवं प्रमाणत्वेन प्रतिपादयामास । सार्वत्रिकानुभवस्तु अन्यथा कर्तुं न शक्यते । अतः ब्रह्मस्वरूपप्रतिपादने ब्रह्मज्ञानफले मोक्षे च साध्यनुभव एव प्रमाणम् इति सिद्धम् ।

न ह्यहंप्रत्ययविषयकर्तृव्यतिरेकेण तत्साक्षी सर्वभूतस्थः समः एकः कूटस्थनित्यः पुरुषो विधिकाण्डे तर्कसमये वा केनचिन् अधिगतः सर्वस्यात्मा ॥ सू. भा. १-१-४

अन्येष्वात्मविज्ञानात्प्रमातृत्वमात्मनः ।
अन्विष्टस्यात्प्रमातैव पाप्मदोषादिवर्जितः ॥ सू. भा. १-१-४

साक्ष्यनुभवप्रमाणसिद्धः अद्वैतसिद्धान्तः । श्रीशङ्कराचार्यस्तु देहेन्द्रियादिषु अहंममाभिमानं ज्ञानेन बाधित्वा स्वरूपेण स्थित्वा अखण्डं सच्चिदानन्दात्मानम् आत्मत्वेन अनुभूय अद्वैतसिद्धान्तं प्रतिपादयामास । अतः अद्वैतसिद्धान्तस्य साक्ष्यनुभवसिद्धत्वेन तम् अन्यथयितुं न केनापि शक्यते इत्यवगन्तव्यम् ॥ अविद्यादृष्ट्यैव जीवजगदीश्वरव्यवहारः, न परमार्थतः ॥

यत्क्षणं देहादीन् अहंममेति मत्वा आत्मानं जीव इति मन्यते, तत्क्षणमेव तमेव अखण्डं परमात्मानम् ईश्वरः अन्यः इति व्यवहरति । यथा एक एव आकाशः अखण्डः सन्नपि घटेन परिच्छिन्नः इति मन्यते अविचारितदृष्ट्या तदा महाकाशो भिन्नो भवति । परमार्थाकाशः अन्यो भवति । परमार्थतः आकाशः एक एव अखण्डो वर्तते सदैव, तथा परमार्थभूतः आत्मा अखण्डितः परिपूर्णः सर्वव्यापकः सदा वर्तत एव जीवेश्वरभेदकल्पनाकालेऽपि, भेदानाम् अविद्याकल्पितत्वात् अभिन्न एव परमार्थतो भवति । यावत्पर्यन्तम् अविद्या वर्तते तावत्पर्यन्तं

जीवेश्वरभेदोऽपि वर्तत एव । यदा अविद्या विद्यया बाध्यते तदैव आत्मानम् अखण्डं सर्वभूतेषु गूढं सर्वव्यापिनं सर्वभूतान्तरात्मानम् आत्मत्वेन पश्यति ॥

> यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ।
> अथ मर्त्योऽमृतो भवति अत्र ब्रह्म समश्नुते ॥

बृ. ४-४-७; का. २-३-१४

## सृष्टिप्रक्रिया

बादरायणमहर्षिभिः 'जन्माद्यस्य यतः' इति सूत्रितम् । शङ्कराचार्यैस्तु 'अस्य जगतः नामरूपाभ्यां व्याकृतस्य अनेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाऽप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात् सर्वशक्तेः कारणात् भवति तद्ब्रह्म' इति जगत्कारणत्वं ब्रह्मणः निर्दिष्टम् । ब्रह्म तु निरवयवं निर्विकारि अखण्डं पूर्णमुच्यते । क्रिया हि नाम सा, या स्वाश्रयं अविकुर्वती नैवात्मानं लभते इति भाष्यकारैरेवोक्तम् । एतेन ब्रह्मणि विकारम् अकुर्वती क्रिया नाम न भवति । ब्रह्म तु अविकारि, तत्कथं ब्रह्मणः जगत्कारणत्वमुच्यते भवद्भिः ? उच्यते । लोके द्विविधं कारणं दृश्यते । घटस्य मृत्कारणत्वमुच्यते । तत्र मृदः विकारं विना घटो न जायते । अन्यच्च स्वाश्रयम् अविकुर्वन्

कार्यं भवति यथा रज्जुसर्पः स्वाश्रयभूतायां रज्ज्वां विकारम् अकुर्वन् रज्जुसर्पो जायते। तथा ब्रह्मणि कल्पितं जगत् स्वाश्रये ब्रह्मणि कश्चिदपि विकारम् अकुर्वन् ब्रह्मणः जायते इत्युच्यते। आश्रयं विना कल्पना न भवतीति कृत्वा आश्रयभूतं कल्पितस्य कारणमित्युच्यते। एवंप्रकारेण जगतः ब्रह्म कारणमित्युच्यते। तस्मात् एवंक्रमेण निरवयवमपि निष्क्रियमपि ब्रह्म जगदाश्रयत्वेन जगत्कारणमित्युच्यते। अतः अत्र न कोऽपि दोषः।

आधुनिकाद्वैतवादिनः अनाद्यनिर्वचनीयवस्तुभूतां मूलाविद्यां जगदुपादानकारणमिति मन्यन्ते। तद्द्वारा च ब्रह्म कारणमिति वदन्ति। श्रुतिषु साक्षात् ब्रह्म कारणम् इति वर्तते। यथा यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभि-संविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्म। इति साक्षात् ब्रह्मैव कारणम् इति वर्तते। मूलाविद्याद्वारा कारणत्वाभ्युपगमे तन्मतं श्रुतिबाधं भवति। अतः मूलाविद्याद्वारेण ब्रह्मकारणत्वं नाङ्गीकर्तव्यम्। मूलाविद्या भाष्यकारैर्नाङ्गीकृता, न च सूचिता। अतः भाष्यविरुद्धा च एषा प्रक्रिया। यावत्पर्यन्तं प्रपञ्चज्ञानैः इन्द्रियैः पश्यन्ति तावत्प-र्यन्तं प्रपञ्चसत्त्वं पश्यन्त्येव। इन्द्रियाणि आत्मना सह अध्यासं विना न शक्नुवन्ति स्वकार्याणि कर्तुम् इत्येतदपि विदितमेव। इन्द्रियाध्यासं परित्यज्य स्वात्मस्वरूपेण तिष्ठन् यदा पश्यति तदा प्रपञ्चो न दृश्यते। अविद्यमानस्य प्रपञ्चस्य कारणप्रश्न एव न उद्भवति।

अविद्यमानत्वादेव । ये पुनः आत्मन्यध्यस्तेन्द्रियैः पश्यन्ति, तेषां सत्यत्वेनैव दृश्यमानत्वात् कारणत्वप्रतिपादनप्रसक्तिर्नैव । तेषाम् अनध्यस्तात्मदृष्टिरेव नास्ति । तैरपि इदमेव कारणमिति कारणं द्रष्टुम् अशक्यत्वात् भिन्नभिन्नदर्शनकाराः भिन्नभिन्नकारणं वर्णयन्ति । यद्यपि श्रीरामानुजाचार्याः अनुभवं अङ्गीकुर्वन्ति तथापि ते व्यष्ट्यनुभवम् अङ्गीकुर्वन्ति । तथा च ममानुभवः अयम् , ममानुभवः अन्यादृशः इति अनुभवभेदः नास्ति इति वक्तुं न शक्यते । अतः व्यष्ट्यनुभवः प्रमाणत्वेन गृहीतुं अशक्यः इति वक्तव्यं किम् ? तथा च सम्प्रदाय-विदः देहेन्द्रियादिषु अहंममाभिमानरूपं स्वाभाविकम् अध्यासं निरस्य केवलात्मरूपेण स्थित्वा वदन्ति ।

> प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ।
> मायामात्रमिदं द्वैतम् अद्वैतं परमार्थतः ॥ मां. २-२२

तथा च प्रपञ्चस्यैव परमार्थतः अविद्यमानत्वात् कारणप्रश्न एव न सम्भवति । अविद्यादृष्ट्यैव प्रपञ्चस्य भावः अङ्गीक्रियते । अविद्या-दृष्ट्यैव प्रपञ्चस्य ब्रह्म कारणं, अध्यासः कारणम् , अविद्याकल्पिता माया कारणम् इति व्यवह्रियते । परमार्थदृष्ट्या प्रपञ्च एव नास्ति, तत्कारण-मपि नास्ति ।

> देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पितः ।
> लौकिकं तद्वदेवेदं प्रमाणं त्वाऽऽत्मनिश्चयात् ॥ सू. भा. १-१-४

# अवस्थात्रयविचारः

लोके विद्वद्भिर्न केवलं सर्वजनैः, किन्तु सर्वप्राणिभिः जाग्रत्स्वप्नसुषुप्त्याख्यम् अवस्थात्रयम् अनुभूयते । विचारकाले यथानुभवं विचारम् अकृत्वा जाग्रदवस्थाया एव प्रामुख्यं कृत्वा जाग्रद्दृष्ट्यैव स्वप्नसुषुप्त्यवस्थे विचारयन्ति । इदन्तु अन्याय्यम् ॥

जाग्रद्दृष्ट्या स्वप्नस्तु केवलं मनसो विकारः इत्युच्यते । मनश्शास्त्रज्ञैरपि तथैवोच्यते । जाग्रद्दृष्ट्या असम्भवं, केवलशिरसा सञ्चरणं, स्वेनैव स्वशिरश्छेदनं कृत्वा शिरः स्वहस्ते निक्षिप्य तस्य वर्णनं, इत्यादिकं च Abnormal Psychology इति तस्य नाम कृत्वा तत्सर्वमपि केवलजाग्रन्मनोवृत्तिरूपमेवेति वर्णयन्ति । भाष्यकारास्तु यान् पश्यति स्वप्ने तान् तत्रैव पश्यति, न तु जागरितादुत्पद्यमानान् इति जाग्रन्मनसः स्वप्ने अभावमुक्त्वा तत्रैव अध्यासकल्पितं अन्यन्मनः मननादिकार्यं करोति इति वदन्ति । ( गौ. का. ४–४१ यदि जाग्रन्मनः एव स्वप्नेऽपि अनुवर्तेत, कथम् आत्मानं मनुष्यं मन्यमानं तदेव मनः स्वप्ने आत्मानं व्याघ्रं वा गजं वा स्त्रियं वा मन्वीत ! तथा मनुते । अतः जाग्रन्मनसः भिन्नमेव स्वाप्नं मनः इति वदन्ति । स्वप्नः स्वप्नानुभवकाले "अयं स्वप्नः" इति निर्णेतुं नैव केनापि शक्यते । स्वप्नस्य अनुभवकाले जाग्रत्त्वेनैव अनुभवन्ति जनाः । स्वप्नं जाग्रत्त्वेन अनुभवन्तः तत्र अन्यं स्वप्नमपि अनुभवन्ति । अतः

यथा इयं जाग्रदवस्था जाग्रत्त्वेन अनुभूयते । तथा स्वप्नोऽपि स्वप्नानुभवकाले जाग्रत्त्वेनैव अनुभूयते । अत एव माण्डूक्यकारिकायाम्–

स्वप्नजागरितस्थाने ह्येकमाहुर्मनीषिणः ।
भेदानां हि समत्वेन प्रसिद्धेनैव हेतुना ॥ इति ( मां.का.२–५ )

यथा जाग्रत् तथा स्वप्नोऽपि अनुभवकाले जाग्रत्त्वेन अनुभूयत इति स्वप्नजागरितस्थानयोः एकत्वं प्रतिपादितम् । स्वप्नान्तबुद्धान्तयोरितरेतरव्यभिचारात् आत्मनः अनन्वागतत्वं च प्रतिपादितम् । यथैव स्वप्नः स्वस्य प्रमातृप्रमाणप्रमेयैस्सह जाग्रत्स्थाने नास्ति (व्यभिचरति) तथा जागरितमपि स्वस्य प्रमातृप्रमाणप्रमेयैस्सह स्वप्ने नास्ति ॥ आत्मा तु उभयोरपि स्थानयोः अव्यभिचरितस्वरूपेण विद्यते । अतः उभाभ्यामपि स्थानाभ्यां आत्मा नानुगतः इति ज्ञायते । आत्मनः जाग्रत्सम्बन्धोऽपि नास्ति स्वप्नसम्बन्धोऽपि नास्ति । अतः आत्मा शुद्धः उभाभ्यामपि स्थानाभ्यां नानुगतः इत्यनेन जाग्रत्प्रमातृप्रमाणप्रमेयैः यथा नानुगतः तथा स्वप्नप्रमातृप्रमाणप्रमेयैश्च नानुगतः इत्यर्थः ॥

एतेन जाग्रद्दिक्कालमनांसि स्वप्नदिक्कालमनोभ्यः भिन्नान्येवेति सिद्धं, परस्परव्यभिचरितानि चेति सिद्धम् । आत्मा तु उभयोरपि स्थानयोरव्यभिचरितस्वरूपेण वर्तते, ताभ्यां जाग्रत्स्वप्नाभ्यां नानुगतश्च इति च सिद्धम् ।[1]

---

(१) स्वप्नान्तबुद्धान्तयोरितरेतरव्यभिचारात् आत्मनोऽनन्वगतत्वं सिद्धम् । ( सू. भा. २–१–६ )

प्रपञ्चस्य व्यभिचरितत्वेऽपि जाग्रति जाग्रत्प्रपञ्चेन सहितः, स्वप्ने स्वप्नप्रपञ्चेन सहित एव आत्मा विद्यते इति प्रपञ्चपरित्याग एव नास्ति इति शङ्कायां सम्प्रसादे प्रपञ्चपरित्यागेन निष्प्रपञ्चसदात्मना सत्सम्पत्तेः निष्प्रपञ्चसदात्मत्वं सिध्यति । अत्र जाग्रत्प्रमाता प्रमाणं प्रमेयोऽपि नास्ति । स्वप्नप्रमाता प्रमाणं प्रमेयोऽपि नास्ति । केवल आत्मा वर्तते । कथम् आत्मा वर्तते इत्युच्यते ? अस्ति चेत् कथं अहमिति आत्मानं वा, इदमिति विषयं, वा न जानाति लोकः ? इति चेत् श्रृणु तत्र कारणं एकत्वात्र विजानाति । द्वितीयं ज्ञेयं ज्ञेयसाधनं च नास्ति । बृ.उपनिषद् " पश्यन्वै न पश्यति । न तु तद्द्वितीयमस्ति यद्विभक्तं पश्येत् इति । आत्मा पश्यन् दृगस्वरूपेणैव वर्तते । दृश्यं नास्ति । अतः न पश्यति" इति वदति । आत्माभावे 'सुखमहमस्वाप्सम् , न किञ्चिदवेदिषम्' इति जाग्रति नैव वदेत् । वदति च । अतः आत्मा सुषुप्तौ अस्त्येवेति च सिद्धम् । सुखमहमस्वाप्सम् इत्यनेन आत्मनः आनन्दरूपत्वं सत्स्वरूपत्वम् । न किञ्चिदवेदिषमित्यनेन ज्ञानस्वरूपत्वं कस्यचिदपि ज्ञेयस्य नास्तित्वं च सिद्धं भवति । यथा पक्षी सूत्रेण पक्षिघातकक्षुद्धस्तेन बद्धः दिशं दिशं पतित्वा पतित्वा श्रान्तः आश्रयभूतां अंगुलीमेव प्राप्तः सुखी भवति, एवमेव अयं पुरुषः स्वाश्रये परमार्थात्मनि बद्धः जाग्रत्स्वप्नयोः कर्म कृत्वा श्रान्तः तच्छ्रमापनुत्तये स्वं रूपं सुषुप्ते प्राप्य सुखी भवति । आत्मा जाग्रत्स्वप्नयोः देहेन्द्रियादि-उपाधिवशात् जीवरूपापत्तिमिव अपेक्ष्य सुषुप्तौ उपाध्युपशमात् स्वरूपापत्ति गत इव स्वस्थः सुखी भवति इत्यर्थः । सर्वदा स्वरूपभूतब्रह्म-

भावः सिद्ध एव, तथापि उपाधिवशात् जीव इव भवति [1]। अहेयम् अनुपादेयं यत् तदेव तस्य स्वरूपं भवति । जाग्रत्स्वप्नधर्मौ हेयोपादेयौ भवतः । अतः तौ न तदात्मधर्मौ । सुषुप्तिस्तु अहेयाऽनुपादेया भवति । अतः सुषुप्तौ यादृशं स्वरूपम् अद्वितीयं सच्चिदानन्दस्वरूपं वर्तते, तदेव आत्मनः स्वरूपम् इति निर्णयो भवति । ब्रह्मैव बुद्ध्याद्युपाधिसंपर्कवशात् जीव इति उपचर्यते । सुषुप्ते उपाधेरुपशान्तत्वात् स्वस्य सच्चिदानन्दस्वरूपे एव स्थितो भवति, ब्रह्मैव भवति । सुषुप्ते सुषुप्त्यनुभवरूपेण विचारिते आत्मा केवलः शुद्धः अद्वितीयः सच्चिदानन्दस्वरूपः इति सिद्धो भवति । भाष्यकाराः 'ब्रह्मैव सुषिस्थानं' इति अवदन् । जाग्रद्दृष्ट्या विचारिते आत्मा अज्ञः इत्यादिरूपेणैव ज्ञातो भवति । अतः अवस्थात्रयविचारः इत्यनेन यथा यथा अवस्थाः अनुभूयन्ते तथा तथा विचार्याः । न जाग्रदवस्थायाः प्राधान्यं कृत्वा जाग्रदवस्थायां स्थित्वा अन्याः अवस्थाः विचार्याः । सार्वत्रिकानुभवानुसारेणैव जाग्रदाद्यवस्थाः विचार्याः । एवं विचारिते आत्मा अद्वितीयः निःसङ्गः परिपूर्णः सर्वात्मा इत्येवमादयः सिद्धा भवन्ति । पश्चादिकाकारादिव्याख्यातारः सुषुप्तौ आत्मैकत्वं नाङ्गीकुर्वन्ति । विवरणकाराः 'ब्रह्मणि अविद्यासाङ्कर्यपरिहारार्थं जीवब्रह्मविभागः सुषुप्तौ अस्तीति अनुमास्यते' इति वदन्ति ॥

(१) स्वप्नजागरितयोस्तूपाधिसंपर्कवशात्पररूपापत्तिमिवापेक्ष्य तदुपशमात्सुषुप्ते स्वरूपापत्तिर्विवक्ष्यते । ( सू. भा. ३-२-७ )

अनुभवविरुद्धतया अनुमानं न प्रमाणं भवतीति सर्वजनसम्मतम् । जीवो जीवत्वं विजहाति सुषुप्तौ इत्येतत् सर्वानुभवसिद्धम् । एतद्विरुद्धतया अनुमाने कृते तस्य प्रामाण्यं कथं भवति ? व्याख्यातृभिः मूलाविद्या अवस्थात्रयेऽपि दण्डायमाना वर्तते इति लिख्यते । अवस्थात्रये अपि मूलाविद्या विद्यते चेत् अद्वैतं कुत्र दृश्यते इति पृष्टे सति ते वदन्ति निर्विकल्पकसमाधौ मूलाविद्या न तत्र केवलात्मैव वर्तते इति । मूलाविद्यायाः ज्ञानेनैव बाधः इति तैरप्यङ्गीकृतम् । तर्हि तत्र ज्ञानं वर्तते किं मूलाविद्यां नाशयितुम् ? ज्ञानाभावे कथं तस्याः नाशः ? अस्तु नाम यथाकथञ्चित् नाशः । बीजरूपमूलाविद्याया अभावे अयं पुरुषः कथं पुनः जाग्रदवस्थां प्रति आगच्छेत् ? असंप्रज्ञातसमाधेर्पुनर्नागच्छति चेत् असंप्रज्ञातसमाधौ मूलाविद्या नासीत् इति वक्ता कः । असंप्रज्ञातसमाधिः व्यक्तेरनुभवः, न सार्वत्रिकानुभवः, अन्यस्य पुरुषस्य तादृशोऽनुभवो नास्ति । अन्येन निर्विकल्पकसमाधौ मूलाविद्या नासीत् इति कथमङ्गीकर्तव्यम् ? सर्वैरपि मूलाविद्यानाशार्थम् असंप्रज्ञातसमाधिः साधयितव्यः इति वेदान्तशास्त्रं विहाय असंप्रज्ञातसमाधिः अभिगन्तव्यः स्यात् । तदा वेदान्तशास्त्रमपि कर्मशास्त्रं स्यात् न ज्ञानशास्त्रं भवेत् । तस्मात् [1]मूलाविद्या अवस्थात्रयेऽपि दण्डायमाना वर्तते इत्येतद्वाक्यं अविचाररमणीयमेव, स्वकपोलकल्पितमेव । विचार्यमाणे तु अनुभवविरुद्धत्वात् नामादरणीयं भवति । प्रपञ्चस्थितः यः कोऽपि पुरुषः पृष्टस्सन् वदति, सुषुप्ते 'अहं न किञ्चिदवेदिषं सुखमहमस्वाप्समि'ति ॥

(१) अवस्थात्रयेऽपि दण्डायमाना । पञ्चपादिका पृ. २०

भाष्यकारास्तु— अवस्थात्रयमेव सर्वैरनुभूयते, यत्किमपि दर्शयितुं स्थानम् अवस्थात्रयमेव, तत्रैव दर्शयितव्यम् इत्यब्रुवन् । तथा च निर्विकल्पकसमाधेरसार्वत्रिकत्वात् प्रमाणत्वेन कथम् अङ्गीकर्तुं शक्यते ?

सुषुप्तौ जीवादिप्रपञ्चः आत्मस्वरूपेणैव स्थितःसन् ऐकात्म्यं यदि उच्यते ये ये जीवाः पूर्वम् अभूवन् ते ते एव कथम् आगच्छन्ति ? यथा गङ्गातुङ्गाकावेरीकृष्णादयः समुद्रं प्राप्य ता एव गङ्गादयः पुनर्नागच्छन्ति । अत्र कथं ते ते जीवा आगच्छन्ति ? छान्दोग्यभाष्ये उक्तम्— यस्मादज्ञात्वा सं प्रविशन्ति ततः व्याघ्रो वा सिंहो वा · · · · यद्यद्भवन्ति तत्ता भवन्ति[1] । इति ॥ अत्रेदं बोध्यम् । उपाधयः सुषुप्तौ उपशान्ता भवन्ति इत्युक्तम् । उपाध्यभावे ब्रह्मैव भवति इत्येतदपि उक्तम् । उपाधयः के ? बुद्ध्यादयः अविद्याकल्पिताः । ते कुत्र लीना भवेयुः ? स्वकारणे एव लीना भवेयुः । कारणं तु अध्यासः, तस्मात् बुद्ध्यादयः अध्यासे एव वर्तन्ते । यावत्पर्यन्तम् अध्यासः ऐकात्म्यज्ञानेन जाग्रदवस्थायां न बाध्यते, तावत्पर्यन्तम् अध्यासकल्पिता अपि उपाधयो न बाध्यन्ते । यदा अध्यासः

---

(१) यस्माच्च एवम् आत्मनः सद्रूपताम् अज्ञात्वैव सत्सम्पद्यन्ते अतस्त इह लोके · · · · तत्कर्मज्ञानवासनाङ्किताः सन्तः सत्प्रविष्टा अपि तद्भावेनैव पुनराभवन्ति ॥ —छा. ६-१-३

आगच्छति, तदैव तत्कल्पिताः उपाधयोऽपि आगच्छन्ति । पूर्वं स्थिता एव उपाधयः आगच्छन्ति । ततः ते ते एव आगच्छन्ति इति उच्यते । उपाधयस्तु अध्यासेन कल्पिताः । तस्मात् ते तत्रैव वर्तन्ते इत्येतत् समञ्जसं भवति । अन्यत्र ब्रह्मस्वरूपे सुषुप्तौ कथं तेषां स्थितिः ? अत एवोक्तम्— सत्प्रविष्टा अपि इति । अत्र एका कथा प्रस्तूयते ॥

कस्मिंश्चित् ग्रामे काचन वृद्धा आसीत् । सा एकस्मिन् दिने रात्रौ अल्पप्रकाशे स्वगृहे सूचीं पातयामास । बहिः मुनिसिपल्प्रदीपः प्रकाशवान् अभूत् । प्रदीपः वर्तते इतिकृत्वा तत्र गत्वा सूचीं विचिनोति स्म । एकः दयालुः पान्थः तस्याः सहायः कर्तव्य इति मत्वा ' अयि वृद्धे, किं विचिनोषि ? ' इति अपृच्छत् । सा ' सूचीं विचिनोमि ' इत्यब्रवीत् । सः 'सा सूची कुत्र पतिता ?' इत्यपृच्छत् । सा 'गृहे पतिता' इत्यब्रवीत् । सः ' तर्हि अत्र किमर्थं विचिनोषि ? ' इत्यपृच्छत् । सा ' गृहे प्रदीपो नास्ति, अत्र प्रदीपो वर्तते इति कृत्वा अत्र विचिनोमि ' इत्यब्रवीत् । स तु ' वृद्धे, गृहे पतिता सूची अत्र लब्धुं कथं शक्यते ? तत्रैव विचिनु ' इत्युक्त्वा अगच्छत् । तादृशवृद्धाकार्यसमानम् अध्यासकल्पितोपाधयः अध्यासं हित्वा ब्रह्मभूते सुषुप्तौ वर्तन्ते इतिवचनम् ॥

एतद्विचारेण किमायातम् ? जाग्रत्स्वप्नसुषुप्त्यवस्थाः तत्तदनुभवानुसारेणैव विचारणीयाः । अनुभवानुसारेण तासु विचारितासु जाग्रति स्वप्नस्याभावः, स्वप्ने जाग्रतः अभावः दृष्टः, तस्मात् तयोः अन्योन्यव्यभि-

चारान् उभेऽपि परमार्थभूते न भवतः । आत्मा तु उभयोरवस्थयोरपि अव्यभिचारी परमार्थभूतः इति निर्णयो भवति ॥ सम्प्रसादावस्थानुभवेन तत्र जाग्रत्स्वप्नयोरभावात् केवलात्ममात्रस्थितेरनुभवात्, आत्मनः अवस्थात्रयेऽपि अव्यभिचरितस्वरूपेण स्थितत्वात् आत्मा अद्वितीयः चिन्मात्रस्वरूपः अज्ञातब्रह्मरूपः इति सिद्धो भवति । आत्मनः एवं-रूपत्वं जाग्रति अज्ञातत्वात् सुषुप्ते ब्रह्मरूपत्वम् आपन्ना अपि पुनः प्रबोधे ते ते जीवा एव आगच्छन्ति । तेषाम् उपाधीनां ज्ञानेन जाग्रति अबाधितत्वात् ॥ यदा जाग्रति उपाधीनां सम्यग्ज्ञानेन बाधो भवति, तदनन्तरं तत्तज्जीवरूपेण नागच्छन्ति । अतः जाग्रदवस्थायामेव ब्रह्मात्मस्वस्वरूपज्ञानं प्राप्तुं सर्वैरपि प्रयतितव्यमिति सिद्धं भवति । 'यत्-क्षणं ब्रह्मज्ञानं तत्क्षणमेव ब्रह्मप्राप्तिः' इति भाष्यकारैरुक्तम् । ज्ञानसम-काल एव ब्रह्मप्राप्तिः इत्यवगन्तव्यम् ॥

---

(१) यत्कालं ब्रह्मज्ञानं तत्कालं ब्रह्मप्राप्तिः । सू.

# मूलाविद्यावादः अथवा मायावादः

शङ्करभगवत्पूज्यपादाः– “ तमेतम् एवंलक्षणम् अध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहाराः लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि ” इति सर्वशास्त्रीयलौकिकव्यवहाराणाम् अध्यासमूलकत्वं प्रतिपादयामासुः । तेषाम् अभिप्रायेण मूलाविद्यावादव्यवहारस्यापि अध्यासमूलकत्वं सिद्धं भवति । श्रीशङ्कराचार्यकालात् त्रिंशितमानोत्तरमागताः पद्मपादिकाकाराः मूलाविद्योपादानकारणवादिनः । ब्रह्मसिद्धिकारैः अविद्योपादानकारणवादिनः परामृष्टाः । तेषाम् अनुयायिनः पद्मपादिकाकाराः इति अनुमान्यते । पद्मपादिकाकाराः– जगदुपादानकारणीभूता मूलाविद्या भगवत्पादैरेव अङ्गीकृता इति भाष्यव्याख्याने कृते सर्वैरपि अयं वादः अङ्गीक्रियते इति मत्वा भाष्योक्तं ‘मिथ्याज्ञाननिमित्तः’ इति समस्तपदं ‘मिथ्या अज्ञानं निमित्तः’ इति पदत्रयं कृत्वा, मिथ्याशब्दः अनिर्वचनीयार्थकः, अज्ञानशब्दः अनिर्वचनीयवस्तुबोधकः, निमित्तशब्दः उपादानकारणार्थकः इति असङ्गतम् अर्थं कृत्वा अनाद्यनिर्वचनीयवस्तूपादानकः प्रपञ्चः इति अर्थं चक्रुः । सा अनिर्वचनीयवस्तुभूता जगदुपादानकारणभूता अग्रहणान्यथाग्रहणसंशयग्रहणादीनामपि उपादानकारणीभूता मूलाविद्या इति प्रतिपादयामासुः । भाष्यकारैः अध्यासस्य “एवम् अयम् अनादिरनन्तः” इति अनादित्वम् उक्तम् अनुभवेऽपि तथैव वर्तते इत्युक्तमपि

अनादृत्य कार्यत्वम् आश्रित्य पण्डिता अपि अध्यासस्यापि उपादान-कारणीभूतां मूलाविद्याम् आश्रिश्चक्रुः । 'मुमुक्षुर्जीवः जीवत्वं विहाय स्वं देवतारूपम् अप्येति' इति भाष्यवाक्यम्[1] अविगणय्य ब्रह्मणि अविद्या-साङ्कर्यपरिहारार्थं जीवब्रह्मविभागोऽनुमास्यते इति विवरणकारैरुक्तम् ।

(१) छा. — जीवत्वविनिर्मुक्तं स्वं देवतारूपम् अप्येति ।

# मूलाविद्या
## एषा नेयाँ प्रक्रिया

येयं श्रुतिस्मृतीतिहासपुराणेषु नामरूपं, अव्याकृतं, माया, अविद्या, प्रकृतिः, अव्यक्तम्, अग्रहणं, तमः, कारणं, लयः, शक्तिः, अक्षरम् इत्यादि च तत्र तत्र बहुधा गीयते– सा मूलाविद्या ॥ — पञ्चपादिका २०

स्वत एवावस्थितब्रह्मलक्षणस्वरूपतावभासं प्रतिबध्य जीवत्वापादिका, विद्याकर्मपूर्वप्रज्ञासंस्कारभित्तिः, सुषुप्ते प्रकाशाच्छादनविक्षेपसंस्कारमात्ररूपस्थितिः, अनादिरविद्या अवस्थात्रयेऽपि दण्डायमाना ज्ञानबाध्या इति ॥

कार्यदर्शनोन्नेयम् आवरणकृत्यं विपर्ययश्च आत्मनि कुर्वन् अज्ञानं भावरूपम् उभयकारणान्यथानुपपत्त्या च कल्प्यते इति ॥
— विवरण १५

भाष्यकारैः ब्रह्मणः अविषयत्वम् असङ्गत्वं च प्रतिपादितेऽपि तद्विरुद्धनया पञ्चपादिकाकारैः ब्रह्मणः मूलाविद्याविषयत्वं मूलाविद्याश्रयत्वं च प्रतिपादितम्। इदन्तु भाष्यविरुद्धम्।

श्रुतिषु 'आत्मा वा इदमेक एवाग्र आसीत्' ॥
'ब्रह्म वा इदमेक एवाग्रे आसीत्' ॥
'सदेव सोम्य इदमग्रे आसीत्' ॥

इति आत्ममात्रसत्यत्वं सृष्टेः पूर्वं प्रतिपादितम् । मूलाविद्यायाः अना-दित्वेनाभ्युपगमे भावरूपत्वाभ्युपगमे च श्रुतिविरोधः स्पष्ट एव भवति । श्रुतिषु ब्रह्मकारणत्वं प्रपञ्चस्य प्रतिपादितम् । मूलाविद्याकारणत्वाभ्युपगमे श्रुतिविरोधः स्पष्ट एव भवति । सुषुप्तौ आत्मनः अद्वितीयत्वं ब्रह्मस्व-रूपत्वं च सर्वैरनुभूयते । मूलाविद्यासत्वाङ्गीकारे सर्वानुभवविरोधः दुर्निवार एव भवति । मायाया लक्षणं भाष्यकारैः माण्डूक्योपनिषद् भाष्ये– स्वप्नमाये यथा दृष्टे गन्धर्वनगरं यथा ।

तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः ॥ ( मां. २–३ )

इत्यत्र या असद्रूपस्वात्मिका सद्रूपस्वात्मिकेव अवभासमाना सा माया इति मायायाः असद्रूपस्वात्मकत्वम् उक्तम् । या 'मा' नास्ति सा माया इति च कारिकाभाष्ये (४–५८) मायेत्यविद्यमानस्य आख्येत्युक्तम् । तेषां विरोधः स्पष्टः । भाष्यकारैः 'ज्ञानं तु ज्ञापकम् न कारकमि'त्युक्तम् । 'ज्ञानं न वस्तुतन्त्र' इति च उक्तम् । अनिर्वचनीयवस्तुभूतमूलाविद्यायाः ज्ञानबाध्यत्वाङ्गीकारे तयोर्भाष्यवाक्ययोर्विरोधः स्पष्टः । वस्तुतः ज्ञान-बाध्यत्वाङ्गीकारे सर्वानुभवविरोधः । अविद्याकल्पितवस्तुनः ज्ञानबाध्यत्वं सम्भवति । इयं कल्पिता न भवति, कल्पनोपादानकारणत्वेनाङ्गीकारात् । मूलाविद्या अध्यासस्य उपादानकारणम् इत्युक्तिरपि अध्यासपुरुषेणैव वाच्या । तथा च अध्यासः पूर्वो वा मूलाविद्या पूर्वा वा ? अध्यास एव पूर्वः । अध्यासं विना व्यवहार एव न सम्भवति, अतः अध्या-सस्य उपादानकारणीभूता न सम्भवति, अध्यासः अनादिः इति भाष्यो-क्तिविरोधः । किञ्च मिथ्याज्ञाननिमित्तः इत्यत्र स्थितस्य निमित्तपदस्य उपा-

दानार्थकत्वकथनम् अन्याय्यमेव । एवं सति अस्ति इति शब्दस्य नास्ति इत्यर्थः किमर्थं न स्यात् ? मूलाविद्या जगदुपादानकारणीभूता न भवति इत्यर्थः कथं न भवेत् ? तथा च न कोऽपि शब्दः निश्चितार्थप्रकाशकः स्यात् । सर्वव्यवहारलोपप्रसङ्ग एव स्यात् । तथापि पद्मपादिकाकारेण मिथ्याज्ञाननिमित्तः इत्यत्र स्थितस्य निमित्तपदस्य उपादानकारणार्थकत्वम्¹ उक्तम् ।

भगवद्रामानुजाचार्यैरपि भगवदधीना भगवच्छरीरा सूक्ष्मा चिद् जगदुपादानकारणीभूतेति यद्यपि अङ्गीकृता तथापि तैः तस्याः ज्ञानबाध्यत्वं नाङ्गीकृतम् । कुतः ? वस्तुनः ज्ञानबाध्यत्वं नास्तीति तैरपि विज्ञातम् । पद्मपादिकाकारादिभिः अनिर्वचनीयं वस्तु ज्ञानेन बाध्यते इत्यङ्गीकृतम् । इदन्तु अनुभवविरुद्धम् ।

अन्यच्च; भाष्यकारैः जीवन्मुक्तिः प्रतिपादिता । "मुक्तिर्नाम स्वरूपावस्थानम्" इति । सम्यग्ज्ञानेन अध्यासे बाधिते देहेन्द्रियादिषु अहंममाभिमाने नष्टे स्वत एव स्वरूपावस्थानम् अनुभूयते इति प्रतिपादितम् । शरीरे पतिते अशरीरत्वं न जिवतः इति चेत् । न । सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात् इत्युक्तम् । निमित्तस्य मिथ्या-

(१) पद्मपादिका : मिथ्या = अनिर्वचनीया
अज्ञानं = प्रपञ्चबीजभूतम् अनिर्वचनीयं वस्तु
निमित्तः = उपादानकारणम्

ज्ञानस्य अपाये नैमित्तिकस्य सशरीरत्वस्यापि अपायात् जीवत एव विदुषः मोक्षाख्यम् अशरीरत्वं सिध्यति । अहं शरीरी इत्येवंरूपे मिथ्याज्ञाने सम्यग्ज्ञानेन बाधिते तन्निमित्तप्राप्तस्य सशरीरत्वस्यापि बाधितत्वात् जीवत एव अशरीरत्वं सिद्धम् । मूलाविद्यावादे मूलाविद्याया जगदुपादानकारणीभूताया सम्यग्ज्ञानेन बाधाङ्गीकारे अपि देहरूपेण विद्यमानत्वात् देहपातानन्तरमेव मोक्षो अभ्युपगन्तव्यः १ । विदेहताकालीन एव मोक्षः मुख्यो मोक्षः इति अद्वैतसिद्धिकारैरुक्तम् । तच्च भाष्यविरुद्धम् । देहपातानन्तरविषयस्य अनुभवागम्यत्वात् केवलवाक्यस्तेनैव अङ्गीकर्तव्यता स्यात् । तच्च भाष्यविरुद्धम् । अन्यच्च ज्ञानाज्ञानयोः वैय्यधिकरण्यात् परस्परबाध्यबाधकत्वं न सङ्गच्छते ॥ मूलाविद्या तु ब्रह्माश्रिता । विद्या तु जीवाश्रिता । तयोर्भिन्नाधिकरणत्वात् बाध्यबाधकभावः न सङ्गच्छते ॥ तथा च मूलाविद्याया बाध्यत्वाभावे कथम् अद्वैतसिद्धिः ? न कथंचित् सिध्यति । या अनादिः सा अनन्ता एव भवेत् । अनादेरन्तवत्त्वं न्यायविरुद्धमिति भाष्यकारैरेव गीताभाष्ये (१३-२) प्रतिपादितम् । एवं च सति अनादेर्मूलाविद्यायाः अन्तवत्त्वं न स्यात्, ततश्च अद्वैतहानिः द्वैतापत्तिश्च अवश्यं सम्भवत एव । अध्यासस्तु मिथ्याज्ञान-

---

(१) अद्वैतसिद्धिः :– विदेहताकालीन एव मोक्षो मुख्यो मोक्षः जीवन्मुक्तेर्गौणत्वात् ।

रूपत्वात् अनाद्यनन्तोऽपि ज्ञानबाध्यः भवत्येव । अध्यासस्य कालकृत-नाशो नास्ति । किन्तु सम्यग्ज्ञानकृतबाधो भवति[१] ।

मूलाविद्या व्यवहारकालस्थिता कर्तुं सत्तात्रयं पद्मपादिकाकारैः प्रकल्पितम् । तद्यथा — पारमार्थिकसत्ता ब्रह्मणि वर्तते । व्यावहारिक-सत्ता कार्यभूतस्य प्रपञ्चस्य, प्रातिभासिकसत्ता तु रज्जुसर्पादेः इति सत्तात्रयं प्रकल्पितम् । मिथ्याशब्देन प्रतिभासमात्रशरीरः प्रपञ्चः इति नार्थः[२] । किन्तु व्यावहारिकसत्यत्वविशिष्टः इत्युक्तिः प्रपञ्चस्य सत्यत्व-बुद्ध्या व्यवहर्तॄणां आश्रयदात्री बभूव । प्रपञ्चस्य व्यावहारिकसत्यत्वं यदि स्यात् तर्हि तद्विषये वैराग्यं न स्यात् । सम्यक् सम्पाद्य भोक्तव्यम् इत्येव तेषां व्यावहारिकाणां मनसि प्रकाशेन । न तु व्यावहारिकसत्ता-विशिष्टप्रपञ्चे विरक्तिरुपपद्येत । इदन्तु भाष्यविरुद्धम्, गौडपाद-कारिकाविरुद्धं च । तथा हि शङ्कराचार्यैः सूत्रभाष्ये (२-१-१६)

---

(१) एवम् अयम् अनादिरनन्तोऽध्यासः । अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते ।

---सू. भा. अध्यासभाष्यम्

(२) क्षेत्रं च मायानिर्मितहस्तिस्वप्नदृष्टवस्तुगन्धर्वनगरादिवत् असदेव सदिव अवभासते इति प्रपञ्चस्य प्रतिभासमात्र-शरीरत्वं भाष्ये उक्तम् । (गी. भा. १३-२६) तादृशस्य प्रपञ्चस्य पद्मपादिकाकारैः व्यावहारिकसत्यत्वं प्रतिपादितम् । इदन्तु भाष्यविरुद्धम् ।

एकं च सत्त्वम् । इत्युक्तम् । तथा च ब्रह्म त्रिषु कालेषु सत्त्वं न व्यभिचरति । इति ब्रह्मणि एकैव सत्ता प्रतिपादिता । तद्विरुद्धतया पद्मपादिकाकारादिव्याख्यातृभिः सत्तात्रैविध्यमङ्गीकृतम् । इदमपि भाष्यविरुद्धम् । अद्वैतसिद्धान्तविरुद्धं च । किञ्च भाष्यकारैःगीताभाष्ये (१३-२) क्षेत्रस्य प्रपञ्चस्य मायाऽविद्यासमत्वं ऊषरोदकसमत्वं च उक्तम् । तादृशप्रपञ्चस्य व्यावहारिकसत्यत्वं वर्तते किम् ? सर्वथा नास्ति । अतः प्रपञ्चस्य व्यावहारिकसत्यत्ववचनं भाष्यविरुद्धम् अद्वैतसिद्धान्तविरुद्धं च ॥ किञ्च श्रीगौडपादाचार्यैः —

स्वप्नमाये यथा दृष्टे गन्धर्वनगरं यथा ।
तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः ॥ मां.का.२-३१ इत्युक्तम् ।

विश्वं स्वप्नवत् दृष्टम् ।
विश्वं मायासमं दृष्टम् ।
विश्वं गन्धर्वनगरवद् दृष्टम् ।

इत्युक्तम् । स्वप्नस्य व्यावहारिकसत्यत्वम् अङ्गीक्रियते किम् ? न हि अङ्गीक्रियते । लोकदृष्टमायायाः गन्धर्वनगरस्य च व्यावहारिकसत्यत्वं व्याख्यातृभिरपि अङ्गीक्रियते किम् ? नाङ्गीक्रियते । तस्मात् प्रपञ्चस्य व्यावहारिकसत्तावत्त्वं सम्भवति । अतः प्रपञ्चस्य व्यावहारिकसत्यत्वविशिष्टवचनं कारिकाकारविरुद्धमित्यपि ज्ञेयम् ।

किञ्च माया न मया कल्पिता, किन्तु उपनिषत्स्वेव वर्णिता इति उच्यते चेत् । तथा हि ?

मायां तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम् ।
हरत्यविद्यां विततां हृदि यस्मिन्निवेशिते ॥ इति

मायां तु प्रकृतिं विद्यात् । मायामुद्दिश्य प्रकृतित्वं विधीयते इति पद्मपादविवरणकारादिव्याख्यातृणामभिप्रायः । सः न सम्भवति । उपनिषत्कारैः पद्मपादविवरणकारोक्ता माया न ज्ञाता । प्रसिद्धम् उद्दिश्य अप्रसिद्धं विधेयम् । तथा च प्रकृतिः प्रसिद्धा, तां मायां विद्यात् इत्यर्थः समञ्जसः । प्रकृतिः अविद्यमाना विद्यमानेव अवभासते इत्यर्थः । तथैव मायिनं तु महेश्वरम् इत्यत्रापि जगति सञ्चरन्तं मायाविनम् ईश्वरमिति ज्ञातुं न शक्यते । अतः ईश्वरं मायिनं विद्यात् । मायावी यथा अविद्यमानं वस्तु विद्यमानमिव प्रदर्शयति, तथैव अयम् ईश्वरोऽपि अविद्यमानं जगत् विद्यमानमिव दर्शयति इत्यर्थः समीचीनः नास्ति ।

भ्रान्तिसिद्धस्य वस्तुनः आस्पदमेव उपादानकारणमिति लोके दृष्टम् । ब्रह्म तु स्वस्मिन् कल्पितस्य जगतः आस्पदम् । अतः ब्रह्म जगतः कारणमिति वक्तुं शक्यम् । मायायाः लक्षणं भाष्यकारैः 'असद्वस्त्वात्मिका सद्वस्त्वात्मिकेव अवभासमाना माया' इत्युक्तम् । (मां.का.१-३१) जगतः असत्त्वे तस्य उपादानकारणापेक्षा नास्तीति जगदुपादानकारणत्वेन मूलाविद्या नाङ्गीकर्तव्या इति सिद्धं भवति । एतेन मूलाविद्या भाष्यबहिर्भूता द्वैतत्वापादिका च इति ज्ञात्वा सा दूरतो निष्कासितव्या ।

अध्यासस्तु सर्वानुभवसिद्धः इति ज्ञात्वा स एव स्वीकर्तव्यः इति प्रार्थये ॥

किञ्च मूलाविद्या ब्रह्मस्वरूपतावभासं प्रतिबध्य जीवत्वापादिका[1] इति उक्तिः हास्यास्पदा भवति । ब्रह्मस्वरूपतावभासः कथं प्रतिबद्धुं शक्यते ? स्वरूपत्वात् न शक्यते । शक्यते चेत् स्वरूपतावभास एव न भवति । अतः मूलाविद्या भाष्यविरुद्धा इति ज्ञात्वा मोक्षार्थिभिः सा बहिष्कार्या ॥

---

(१) ब्रह्मस्वरूपतावभासं प्रतिबध्य जीवत्वापादिका ।

—पञ्चपादिका २०

# मोक्षः

देहाद्युपाध्यविविक्तस्यैव सतः जीवस्य श्रुतिकृतं विवेकविज्ञानं शरीरात् समुत्थानं विवेकविज्ञानफलं स्वरूपेणाभिनिष्पत्तिः केवलात्म-स्वरूपावगतिः । ( सूत्रभाष्ये १–३–१९ ) इत्यादिना भाष्यकारैः स्वरूपावस्थानं मोक्षः इति मोक्षस्वरूपं वर्णितम् । इदानीं सर्वे जनाः देहे अवस्थानं वा, इन्द्रियेषु अवस्थानं वा कुर्वन्तः दृश्यन्ते । देहे अवस्थानं नाम देहे आत्मबुद्धिः । इन्द्रियेषु अवस्थान नाम इन्द्रियेषु आत्मबुद्धिः । इयमेव अविद्या ।

अविद्वान् पुरुषः सुखदुःखादीनि अनुभवति । अयं पुरुषः निषिद्धं कर्म कृत्वा तत्फलं अस्मिन् देहे वा देहपातानन्तरं वा सूक्ष्म-शरीरेण शरीरी भूत्वा नरकं गत्वा दुःखमनुभूय पुनः मनुष्यलोकं प्राप्य सञ्चितकर्मानुसारेण जन्म लब्ध्वा पुनः पुण्यं वा पापं वा करोति । तथैव अन्यः पुण्यं कर्म कृत्वा इहापि सुखमनुभूय देहपातानन्तरं सूक्ष्म-शरीरं प्राप्तः चन्द्रमण्डलं गत्वा स्वर्गं गत्वा स्वर्गसुखमनुभूय पुनर्मनुष्य-लोकं प्राप्य[१] सञ्चितकर्मानुसारेण जन्म लब्ध्वा पुनः पुण्यं वा पापं वा करोति । अयमेव संसारः, अयमेव बन्धः । अन्यः पुरुषः शास्त्रीयं

---

(१) क्षीणे पुण्ये मर्त्यलोकं विशन्ति ॥ ——भ. गी. ९–२१

कर्म अनुष्ठाय इतरकालेषु भगवन्तम् उपास्ते, सः अत्र सुखमनुभूय देहपातानन्तरं सूक्ष्मदेहेन सूर्यमण्डलं भित्त्वा उत्तरमार्गेण अमानवपुरुषेण नीतः, ब्रह्मलोकं गत्वा ब्रह्मणा सह आत्मविचारेण आत्मज्ञानं लब्ध्वा मुक्तो भवति । ज्ञानक्रमाभावे तु

"आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन"[1]

इति भगवदुक्त्यनुसारेण पुनर्मनुष्यलोकं प्राप्य सञ्चितकर्मानुसारेण जन्म लब्ध्वा पुनः पुण्यं वा पापं वा कर्म करोति । एवंक्रमेण संसरतीति संसारः ॥

---

(१) ब्रह्मलोकं प्राप्तोऽपि ज्ञानप्राप्त्यभावे पुनः मर्त्यलोकं प्राप्नोति ।

# मोक्षः

मोक्षो नाम स्वरूपेणावस्थानमित्युक्तम् । यदहेयं यदनुपादेयं तदेव स्वस्वरूपं भवति । अहेयत्वात् त्यक्तुं न शक्यते, अनुपादेयत्वात् आदातुमपि न शक्यते । स्वरूपत्वादेव । तर्हि कथं बन्धः ? कथं मोक्षः ? स्वरूपस्य सिद्धत्वात् । सिद्धत्वेऽपि अज्ञातत्वात् असिद्ध इव भवति । तथथा कश्चन महदैश्वर्यवान् धनं निगूढं निक्षिप्य मरणकाले पुत्रेभ्यः प्रवक्ष्यामि इति तूष्णीं बभूव । मरणकालः सम्प्राप्तः । पुत्रेभ्यः निक्षिप्तधनविचारस्य कथनात्पूर्वमेव वागिन्द्रियव्यापारः स्तब्धोऽभूत् । वक्तुं न शशाक । पित्रार्जितं धनं यथेष्टं निक्षिप्तमस्ति । तथापि पुत्रैः अज्ञातत्वात् ते दरिद्राः अभूवन् । तेषु और्ध्वदैहिककर्म कर्तुमपि धनं नासीत् । तथैव सर्वेषां स्वरूपं सच्चिदानन्दब्रह्मस्वरूपमेव । तथाऽपि 'ममस्वरूपं सच्चिदानन्दस्वरूपमेव' इति अज्ञातत्वात् अहं जीवः, अहं संसारी इति सुखी दुःखीति च अविद्यया आत्मानं बद्धं मन्यते । देहेन्द्रियादिषु अहंममाभिमानस्तु मिथ्याज्ञानरूप एवेति विदितमेव । स अभिमानः नैसर्गिकः आत्मानात्मनोः विवेकग्रहणाभावात् उत्पन्नः । कीदृशः विवेकः ? पञ्चभूतानि जडानि । भूताज्जातानि भौतिकानि च जडानि । भौतिकेभ्यो वनस्पतिभ्यः जातानि तण्डुलादिधान्यानि जडानि । इमे विषयाः जडाः अहं तण्डुलं, अहं गोधूमः इति न कोऽपि जानाति । यथा तान्येव अन्नरूपं आपाद्य भुक्तानि भवन्ति,

शुक्लशोणितरूपेण परिणतानि देहेन्द्रियरूपाणि भवन्ति, तदानीमेव तेषु अहमिति बुद्धिरुत्पन्ना भवति । इयमेव अनात्मसु आत्मबुद्धिः अध्यासः मिथ्याज्ञानमित्युच्यते । इयं नैसर्गिकी बुद्धिः । इयमेव छान्दोग्योपनिषदि प्रतिपादितम् । भुक्तमन्नं त्रेधा विभज्यते, यदणिष्ठं सारभूतं तन्मनः । यन्मध्यमं तन्मेदोमज्जारूपं भवति, यदसारभूतं तन्मलमूत्ररूपेण बहिः निस्सरति इति ॥ अत्र विचारः आवश्यकः । तण्डुलगोधूमरूपेण परिणामपर्यन्तं इमे विषयाः जडाः इति मन्यन्ते । देहेन्द्रियादिरूपेण यदा परिणतानि तदा अहमेवेति सर्वोऽपि मन्यते[1] तत्कथं सम्भवति ! न कथंचित् सम्भवति । अहं चेतनः अन्यान् मां च जानामि शुद्धः निरवयवः । अयं तु देहेन्द्रियादिसङ्घातः विषयः जडः स्वमेव न जानाति । कथम् एतयोरुभयोः ऐक्यं सम्भवति ! न कथंचित् सम्भवति । तस्मान्नाहं देहः, नाहं इन्द्रियाणि, अहम् एषां देहेन्द्रियाणां द्रष्टा, इमानि दृश्यानि कथंचित् मम च एषां च ऐक्यं न सम्भवति । अहं तु चेतनः चिन्मात्रस्वरूपः निरवयवः शुद्धः, इमानि मया सह अध्यस्तानि यदा न भवन्ति तदा साधकसंज्ञकानि भवन्ति । पुत्रमित्रकलत्रादयोऽपि दूरतः

---

(१) अन्योन्यस्मिन् अन्योन्यात्मकतां अन्योन्यधर्मांश्चाध्यस्य इतरेतराविवेकेन अत्यन्तविविक्तयोर्धर्मधर्मिणोर्मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य अहमिदं ममेदमिति नैसर्गिकोऽयं लोक व्यवहारः ॥ अध्यासभाष्यम् ।

पश्यन्ति, अन्यमपि नेच्छन्ति । तस्माच्छङ्कराचार्याः भजगोविन्दस्तोत्रे एवमब्रुवन्

का ते कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः ।
कस्य त्वं कः कुत आयातः तत्त्वं चिन्तय तदिदं भ्रातः ॥

भो भ्रातः ! प्रथमतः शरीराध्यासः, तदनन्तरं कान्ताध्यासः, तदनन्तरं पुत्राध्यासः – इत्यादिरूपेण आत्मनः भिन्नेषु आत्मत्वेन आत्मीयत्वेन च अध्यासं कृत्वा तेषां सुखदुःखानि आत्मन्यध्यारोप्य अहं सुखी दुःखी इति सुखदुःखानुभवं भ्रान्त्या अनुभवन्ति । ते के ! तेषां मम च कः सम्बन्धः ! इत्येतानि चिन्तय । त्वमेव जानीषे आध्यासिकसम्बन्ध एव सम्बन्धः इति । तस्मादेतां भ्रान्तिं त्यक्त्वा तत्त्वं चिन्तय । इति अनात्मसु देहेन्द्रियादिषु यः आत्मप्रत्ययः स मिथ्याप्रत्ययरूपः स्वाभाविकः अध्यासः । तस्य आत्मानात्मनोः विवेकज्ञानेन अनुभवरूपेण बाधो भवति । बाधसमकाले एव आत्मनः निजस्वरूपेण अवस्थानरूपं मोक्षं लभते । निजस्वरूपं तु पूर्वमेव सिद्धम् । इदानीं ज्ञानेन प्राप्यते इति कृत्वा मोक्षः ज्ञानफलमिति फलमिव फलमिति उपचर्यते ॥

अत्र छान्दोग्योपनिषदि प्रयुक्ताम् एकां कथाम् उदाहरिष्यामि —

## राजपुत्रे स्मृतिप्राप्ते व्याधभावो निवर्तते ॥

कश्चन राजा आसीत् । तस्य एकः पुत्रः समजनि । पञ्च मासाः गताः । अनन्तरं तच्छत्रवः आगत्य तं राजानं तत्पत्नीञ्च जघ्नुः । तत्संरक्षकी व्याधजातीया काचन स्त्री 'अयं मम पुत्रः' इति प्रकटीकृत्य स्वगृहं प्रति तं शिशुं निन्ये । शत्रवोऽपि तं तत्पुत्रं मन्यमानाः तद्विषये तूष्णीं स्थिताः । सा तु तं स्वगृहं नीत्वा स्वपुत्रमिव पोषयामास । तदा तदा बालकाय कथारूपेण राज्ञो चरित्रं कथयामास। तदा तदा राजगृहं नीत्वा 'अत्र राजा उपविशति स्म', 'अत्र राजा शेते स्म' इति तत्स्थलानि दर्शयामास । यदा तु सः यौवनस्थो बभूव, तदोक्तं सर्वमपि ज्ञातुं शक्तोऽभूत् तदा सा " पुत्र ! त्वं मम पुत्रः न भवसि, किन्तु राजपुत्रोऽसि, शत्रवः तव पितरं मातरं च हत्वा राज्यं वशीकृत्य राजा बभूव, त्वम् इदानीं तान् जित्वा त्वमेव राजा भव " इति उवाच । तदोक्तं सर्वं यथार्थत्वेन ज्ञात्वा सेनां सङ्गृह्य तं शत्रुभूतं राजानं संहृत्य स्वराज्यं लब्ध्वा राजा बभूव ॥

सः 'अहं व्याधपुत्रः' इति आत्मानं मन्यमानकालेऽपि राजपुत्र एव आसीत् । किन्तु 'अहं राजपुत्रः' इति न विजज्ञौ । तदाः उपदेशानन्तरं 'अहं राजपुत्रः' इति विजज्ञौ[१] । 'अहं राजपुत्रः' इति ज्ञानं नासीत् । किन्तु राजपुत्र एव बभूव ॥

---

(१) राजसूनौ स्मृतिप्राप्ते व्याधभावो निवर्तते । —ब्र.

एवमेव अयं जीवात्मेतिप्रसिद्धः आत्मा सदा परमात्मैव । किन्तु 'अहं परमात्मा' इति न जानाति । 'तत्त्वमसि' इति गुरूपदेशानन्तरं देहात्मभावं त्यक्त्वा सच्चिदानन्दस्वरूपेणैव स्थितो भवति । मम स्वरूपं सच्चिदानन्दस्वरूपमेवेति ज्ञातुं प्रतिबन्धके स्वस्य सच्चिदानन्दस्वरूपेण अग्रहणं, अहं कर्ता भोक्ता जीवः इति अन्यथाग्रहणं च उभे एव । यदा अग्रहणान्यथाग्रहणरूपे उभे अपि प्रतिबन्धके सम्यग्ज्ञानेन बाधिते भवतः तत्क्षणमेव अहं सच्चिदानन्दस्वरूपः परमात्मैव इति सम्यग्ज्ञानं लभते । ज्ञानमक्काल एव तस्य ज्ञानस्वरूपत्वात् चिन्मात्रस्वरूपत्वाच्च अहं सच्चिदानन्दस्वरूप एव इति अनुभवावसानं ज्ञानं लभते । तात्मस्वरूपस्य अद्वितीयत्वात् तज्ज्ञानस्यापि अद्वितीयत्वम् । तस्मात् तस्य बाध्यत्वशङ्काऽपि न सम्भवति । तस्य अद्वितीयत्वात् बाध्यत्वं दूरत एव निरस्तम् । ये पुनः आत्मज्ञानस्य कर्म वा आवरणं वा प्रतिबन्धकमिति वदन्ति, ते प्रष्टव्याः कथं स्वरूपस्य बाधभूतं कर्म वा आवरणं वा प्रतिबन्धके भवतः इति । ज्ञानस्य प्रतिबन्धकम् अज्ञानम् इत्येतत् लोकानुभवसिद्धम् । कर्मणो वा आवरणस्य वा ज्ञानप्रतिबन्धकत्वेन लोके न प्रसिद्धिः । किञ्च स्वस्वरूपावसानं मोक्षः[1] ॥ स्वस्वरूपम् अन्यस्य अनुग्रहेण सिध्यति इत्येतदपि

---

(१) स्वरूपावस्थानं मोक्षः । —सू. ४-४-२१
विवेकज्ञानफलं केवलात्मस्वरूपावगतिः । सू.भा. १-३-१९
स्वरूपावस्थानमेव कैवल्यम् । —भ. गी. १८-६६

अनुभवसिद्धम् । अन्यानुग्रहेण सिध्यति चेत् तत् स्वरूपमेव न भवति ॥

भगवता गीताचार्येण श्रीकृष्णेन ४–३५ श्लोके एवमुक्तम्–

यज्ज्ञात्वा न पुनर्मोहम् एवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥

भो पाण्डुपुत्र अर्जुन ! येन ज्ञानेन प्राप्तेन इदानीं त्वया प्राप्तं मोहं पुनः न प्राप्नोषि, किञ्च येन ज्ञानेन समस्तभूतानि त्वयि मयि च द्रक्ष्यसि, तत् तादृशं ज्ञानं लब्ध्वा पुनः एवं मोहं न अवाप्स्यसि इति सर्वभूतात्मत्वं सर्वात्मत्वं ज्ञानफलं प्रदर्शितम् । स एव मोक्ष इत्यभिधीयते । स तु सर्वात्मज्ञानेनैव लभ्यते इत्युक्तं भवति ॥

किञ्च भगवान् वासुदेवः गीताशास्त्रोपसंहारसमये इमं श्लोकं जगौ –

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ भ.गी. १८-६६

एतदर्थकं प्रश्नं कठोपनिषदि नचिकेताः यमं पप्रच्छ ।

अन्यत्र धर्मादन्यत्राधर्मात्
अन्यत्रास्मात् कृताकृतात् ।
अन्यत्र भूताच्च भव्याच्च
यत्तत्पश्यसि तद्वद ॥ क. इति ।

धर्माधर्मौ अतिक्रम्य कार्यकारणभावम् अतिक्रम्य भूतभविष्य-द्वर्तमानकालसम्बन्धम् अतिक्रम्य देशसम्बन्धम् अतिक्रम्य कर्तृत्वभोक्तृत्वे च अतिक्रम्य यत्तत्वं वर्तते यत्त्वं पश्यसि = अनुभवसि तद्भव ॥ इति ॥

शरणागतिः प्रपत्तिः धर्मः अस्तु । शरणागतिरूपं प्रपत्तिरूपं च धर्मम् अतिक्रम्य केवलनिष्क्रियानन्दरूपेण तिष्ठ ॥ इति गीताश्लोकार्थः[१] ।

सर्वधर्मपरित्यागे प्रमातृत्वमेव परित्यक्तं भवति । प्रमातृत्व-परित्यागाभावे सर्वधर्मपरित्यागो नोपपद्यते । मामेकं शरणं व्रज इत्यस्य प्रमातृत्वपरित्यागात् परं यत् स्वात्मस्वरूपं सच्चिदानन्दाद्वयरूपं तद्रूपे तिष्ठ इत्येव अर्थः । तादृशस्वरूपज्ञानेन अज्ञानस्य बाधात् शोकस्य अवकाशो नास्ति इत्यर्थः । श्रीमद्रामानुजाचार्याः मामेकं शरणं व्रज इत्यस्य प्रपत्तिं कुरु इत्यर्थं कुर्वन्ति ॥

प्रपत्तिः शेषः धर्मः अस्तु । सर्वधर्मान् परित्यज्य इत्यनेनैव प्रपत्तिरूपधर्मस्यापि परित्यागो विहितः । पुनः प्रपत्तिम् आश्रयितुं कथं शक्यते ? सर्वशब्दस्य प्रपत्ति विहाय इति शरणागतिगद्ये भाना-भावः ॥

---

(१) गी. भा. १८–६६

सर्वधर्मान्परित्यज्य संन्यस्य सर्वकर्माणि । मामेकं सर्वात्मानं समं सर्वभूतस्थम् ईश्वरम् अच्युतं गर्भजन्मजरामरणवर्जितं 'अहमेव' इत्येवं शरणं व्रज ॥

तस्मादात्मनः स्वरूपावस्थानं शरणं भज इत्यस्यार्थः एव समीचीनः । प्रपत्तिरूपधर्मः विशिष्टधर्मः इति श्रद्वैतिनोऽपि मन्यन्ते । अत्र सर्वधर्मपरित्यागः उक्तः । कर्तृत्वभोक्तृत्वत्यागे एव सर्वधर्मत्यागः सम्भवति ॥

मा-श्रद्वैतिनोऽपि भगवच्छरणत्वं वदन्ति । भगवच्छरणत्वं धर्म एव स्वलु । सर्वधर्मान् परित्यज्य इत्यनेन भगवच्छरणत्वरूपधर्मोऽपि परित्यक्तः स्वलु । पुनः कथं सः आविर्भवति ?

धर्माधर्मपरित्यागः प्रमातृत्वपरित्यागे एव सम्भवति, नान्यथा सम्भवति । अतः प्रमातृत्वपरित्यागपूर्वकं धर्माधर्मपरित्यागे[1] स्वस्वरूपावस्थानं मोक्षः इति सिद्ध्यति ॥

प्रमातृत्वम् अस्य स्वरूपं तु न भवति देहादिषु अहंममाभिमानपूर्वकत्वात् सुपुप्ते प्रमातृत्वस्य अभावाच्च स्वप्ने जाग्रत्प्रमातृत्वस्य व्यभिचारात् जाग्रति स्वप्नप्रमातृत्वस्य च व्यभिचारात् । सुषुप्तौ जाग्रत्प्रमातुः स्वप्नप्रमातुः अभावाच्च प्रमातृत्वं नात्मस्वरूपमिति सिद्धं भवति । तस्मात् तत् त्वम् त्वम् त्वक्तव्यम् । प्रमातृत्वे ज्ञानेन बाधिते स्वरूपावस्थानं प्रतिपद्यते । स्वस्वरूपेण अवस्थानं मोक्षः इति सिद्धं भवति । प्रमातृत्वपरित्यागं विना सर्वधर्मपरित्यागः नैव सम्भवति ।

---

(१) स्वरूपावस्थानमेव कैवल्यम् । गी. भा. १८–६६

भाष्यकारैरुक्तम् —

अन्वेष्टव्यात्मविज्ञानात्प्राक्प्रमातृत्वमात्मनः ।
अन्विष्टस्स्यात् प्रमातैव पाप्मदोषादिवर्जितः ॥

आत्मविज्ञानात्प्राक् अहं प्रमाता इति मन्यते । आत्मविज्ञानादनन्तरं प्रमातैव पाप्मदोषादिवर्जितः परमात्मैव भवति इति सर्वं शिवम् ॥

# साधनसोपानानि

साध्यस्य साधनम् अपेक्षितम् । मोक्षस्तु सिद्धः । किमर्थं साधनमिति चेत् । उच्यते । मोक्षस्य स्वरूपावस्थानरूपस्य सिद्धत्वेऽपि अज्ञातत्वात् अज्ञानपरिहारार्थं साधनानि अपेक्ष्यन्ते ।

**प्रथमं सोपानं पापकर्मानुष्ठानत्यागः ।**

भगवान् अर्जुनेन एवंरीत्या पृष्टः—

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ भ.गी. ३–३६

पापकर्ताऽपि जानाति असत्यवचनं नैव वक्तव्यम्, अन्यायम् न अपहर्तव्यमित्यादि । तथापि केनापि बलात्कारेणैव नियोजित इव पापं कर्म करोति ॥ नियोजकः कः ? इति अर्जुनेन पृष्टः भगवान् उवाच—

काम एषः क्रोध एषः रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ भ.गी. ३–३७

अर्जुन, रजोगुणादुत्पन्नः महाशनः महापाप्मा कामः तव प्रबलः वैरी । काम एव प्रतिहतस्सन् क्रोधरूपो भवति । " क्रुद्धः

पापं न कुर्यात् कः ! " इति आञ्जनेयवचनानुसारेण विवेकहीनो मृषा पापं कुरुते इत्येतत्सर्वानुभवसिद्धम् । अतः कामं वैराग्येण जित्वा पापकर्मणः दूरे भव । इति भगवान् उक्तवान् ।

अतः यः कामं जयति सः पापं कर्म नानुतिष्ठति । अतः त्वं कामं जय । तदा पापकर्म न करोषि इत्यवदत्[१] ।

## द्वितीयं सोपानं शास्त्रीयकर्मानुष्ठानम् ।

शास्त्रस्य मनुष्याधिकारत्वात् मनुष्यानेव अधिकरोति शास्त्रम् इति सूत्रभाष्ये वर्तते । शास्त्रं तु नित्यं कर्म अधिकारिणा अनुष्ठेयम् इति विदधाति[२] ।

नित्यकर्मानुष्ठाने प्रत्यवायं च वदति शास्त्रम् ।

'अहरहः सन्ध्यामुपासीत' 'गृहस्थेन औपासनं कार्यम्' 'ब्रह्मयज्ञेन यजेत' इत्यादिरूपेण विधीयमानं कर्म नित्यं कर्म, तत् कुर्यादित्यर्थः । शास्त्रीयकर्मानुष्ठानाभावे निषिद्धं कर्म करोत्येव । यतः–

---

(१) अभियुक्तोक्तम्– उपकाराकरणेऽपि अपकाराकरणं महदुपकारं मन्यन्ते इति ॥ अपकाराकरणं प्रथमं सोपानम् इति ।

(२) कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥ भ.गी. २–४७

नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ भ.गी. ३-५

न कश्चिदपि क्षणमपि लोके कायिकं वा वाचिकं वा मानसं वा कर्म अकुर्वन् विद्यते । यस्किमपि कर्म करोत्येव । अतः शास्त्रविहितकर्मानुष्ठानाभावे–निषिद्धं कर्म करोत्येवेत्यर्थः । तत्फलं च दुःखानुभवः । अतः नियमेन शास्त्रविहितं कर्म कुर्यादित्यर्थः ॥

## तृतीयं सोपानं कर्मयोगः ।

यत्र अहमेव इदं कर्तुं समर्थः नेतरः इति अहंकारपूर्वकं यत् क्रियते, फलार्थिना येन यत्कर्म क्रियते, एतत्कर्म मयैव साध्यं नान्येन इति यत् क्रियते, कर्तृत्वफलसङ्गकर्मसङ्गं च आश्रित्य यदा क्रियते तदा फलप्राप्तौ तुष्यति फलाप्राप्तौ दुःखमाप्नोति । अतः—

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ भ.गी. ५-१०

इति भगवदुक्तप्रकारेण यत्कर्म क्रियते तत्कर्मणः फलसङ्गं कर्तृसङ्गं कर्मसङ्गं च विहाय ईश्वरार्पणबुद्ध्या तत् कर्तव्यमित्यर्थः । एवं कृते यथा जले स्थितं पद्मपत्रं जलस्पृष्टं न भवति तथा कर्म कुर्वन्नपि न कर्मस्पृष्टः भवति । ततो हर्षो वा दुःखं वा न भवति इत्यर्थः ॥

यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ भ.गी. १८-५

ब्रह्मार्पणबुद्ध्या कृतानि यज्ञदानतपांसि चित्तशुद्ध्यर्थानि भवन्ति । शुद्धचित्तस्य ज्ञानम् उत्पद्यते ॥

भगवानेव ब्रवीति—

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥ भ.गी. १८-६

फलसङ्गं कर्तृत्वसङ्गं कर्मसङ्गं च सन्त्यज्य एतानि ईश्वरार्पणबुद्ध्या कर्तव्यान्येव इति निश्चितं भगवन्मतम् ॥

चतुर्थं सोपानं कर्मसंन्यासयोगः ।

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ भ.गी. १२-६
तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ॥ १२-७

ये तु भगवत्पराः भगवन्तमेव ध्यायन्तः नित्ययुक्ता उपासते, सर्वाणि कर्माणि भगवत्समर्पणं कुर्वन्ति, तेषां भगवानेव मृत्युसंसार-सागरात् उद्धर्ता भवति इत्यर्थः ।

अत्र एका कथा अनुसन्धेया । कश्चन स्वयमार्जितेन धनेन धनिकः अभूत् । सः कस्मिंश्चिद्दिने स्वस्य सस्यसम्पूर्णां भूमिं द्रष्टुं गतः । तत्र एका गौः फलपूर्णं सस्यं भक्षयन्ती आसीत् । स धनिकः स्वामी तां दृष्ट्वा कुपितः एकेन पाषाणेन तां ताडयामास । 'कुद्धः पापं न कुर्यात् कः ! ' सा ताडिता तत्रैव मृता अभवत् । तदानीं स धनिकः यजमानः 'एतत्कर्म कृष्णार्पणमस्तु' इत्यब्रवीत् । कतिपय-कालानन्तरं तस्य मरणकालस्समजनि । तदा तस्य मरणानन्तरं तं नेतुं यमदूताः तत्र आगताः । तथैव विष्णुदूताश्च आगताः । यमदूताः विष्णुदूतान् एवम् अब्रुवन्— 'भो विष्णुदूताः, यूयं किमर्थमागताः ! अयं महापापी गोघ्नः' इति । ते तु अब्रुवन् ' अनेन धेनुहननाख्यं कर्म कृष्णार्पणं कृतम् । तस्मान्नायं पापी, किन्तु विष्णुभक्तः एव' इति मत्वा वयमागताः इत्यवोचन् । तदा ते सर्वे 'अयं महापापी वा विष्णुभक्तो वा' इति तं परीक्षितुं रक्षकाधिकारिवेषरूपेण ( पोलिस ) आगताः । तद्गृहमागत्य इदं गृहं कस्य ! अस्य निर्माता कः ! इति अपृच्छन् । स तु मुमूर्षुः मयेदं निर्मितम् । मम पितुः जीवनकाले केवलं कुटीरे अवसम् । मम यौवनानन्तरं मया सम्पादितद्रव्येण इदं गृहं मया निर्मितमित्यब्रवीत् । यमदूताः विष्णुदूतान् 'ज्ञातं वा एतेन कृतं गोवधरूपं कर्म कृष्णार्पणं कृतं कीदृशम् ! ' इति अवदन् । ततो तस्यैव अन्यत् क्षेत्रं गत्वा 'कस्येदं क्षेत्रम्' इत्यपृच्छन् । स तु इदमपि ममैव क्षेत्रम् । मया सम्पादितद्रव्येण क्रीतम् इत्यवदत् । तदा

विष्णुदूताः 'अनेन गोवधरूपं कर्म एकमेव तत्फलमूतदुःखनिवृत्त्यर्थमेव कृष्णार्पणं कृतम् । अयं तु वधकः' इति ज्ञात्वा यत्र धेनुः मृता पतिता अभूत् तं देशं गत्वा 'गोवधरूपं एतत्कर्म केन कृतम् ?' इत्यपृच्छन् । तदा स मुमुक्षुः 'एतत्कर्म मयैव कृतम्, किन्तु तत् कृष्णार्पणं कृतम्' इत्यब्रवीत् । तदा विष्णुभक्ताः एतत् श्रुत्वा अयं वधकः इति ज्ञात्वा अगच्छन् । तस्य मरणानन्तरं यमदूताः तं यमलोकं निन्युः । यमाज्ञया शिक्षां तस्य ददुः ॥

भगवद्वचनं तु एवं वर्तते —

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ॥ इत्यादि भ.गी. १२–६

एतादृशवञ्चनारूपेण केवलं पापकर्ममात्रं भगवदर्पणं कुर्यात् इति नास्ति । ये भगवन्तमेव ध्यायन्तः अहंभावं त्यक्त्वा सर्वाणि कर्माणि भगवदर्पणं कुर्वन्ति तेषामेव भगवान् मृत्युसंसारसागरात् उद्धर्ता भवति । नान्येषां वञ्चकानाम् इति ज्ञेयम् ।

भगवता पुनरपि उक्तम्—

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ गी. इति ।

यत्कर्म क्रियते यदुच्यते यच्छ्रूयते यच्चिन्त्यते यद्भुज्यते तत्सर्वं भगवते अर्पयेत् इत्यर्थः ॥

पञ्चमं सोपानं ध्यानयोगः ।

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
आरूढस्य च तस्यैव शमः कारणमुच्यते ॥ भ. गी. ६–३

ध्यानमारम्भकाले अहं ध्यानकर्ता इति ज्ञानं वर्तते । आरूढा-
नन्तरं कर्तृत्वज्ञानं निवर्तते, भावनया देवो भवति ॥

अत्र एका कथा अनुसन्धेया ।

जरत्कारुरिति आरुरुक्षुः कश्चन मुनिः आसीत् । सः 'यावत्-
पर्यन्तं मम अनुवर्तिनी तावत्पर्यन्तमेव त्वं पत्नी, अहं तव पतिः' इति
समयनिबन्धनेन काञ्चित् योग्यां स्त्रियम् उपयेमे । सः अनन्तरं योगा-
रूढो बभूव । कस्मिंश्चित् दिवसे सः सायंसन्ध्याकाले पत्न्याः ऊर्वोरुपरि
शयितः ध्यानारूढो बभूव । तत्पत्नी तदा एवम् आलोचयामास ।
अयं कदाऽपि सन्ध्याकाले न सुप्तः । अद्य शेते । अयं सुप्तो वा
योगारूढो वा इति ज्ञातुं मया न शक्यते । अतः इमं बोधयामि इति ।
तं च बोधयामास । स तु 'इयं मम ध्यानस्य भङ्गं कृतवती' इति
निमित्तः तां परित्यज्य समयनिबन्धनानुसारेण 'आवयोर्विवाहः परिसमाप्तः'
इत्युक्त्वा जगाम ॥ इति ।

अनया कथया किं ज्ञातव्यम् ?

यः कोऽपि यावत्पर्यन्तम् आरुरुक्षुर्भवति तावत्पर्यन्तं कर्तृत्वस्य
विद्यमानत्वात् अनेन सन्ध्यादि नित्यं कर्म कर्तव्यमेव । यदा

ध्यानारूढो भवति तदा भावनया देव एव भवति। अहम् इति ज्ञानं न भवति। अतः अस्य कर्मसम्बन्धो न भवति। तस्य कर्माननुष्ठानेन प्रत्यवायो न भवति। ध्यानारूढत्वात्पूर्वमेव अनेन कर्माणि अनुष्ठेयानि, ध्यानारूढत्वप्राप्त्यनन्तरं भावनया देवत्वप्राप्त्या कर्तृत्वमेवापगच्छति। कर्तृत्वाभावे कर्मानुष्ठानाभावः सम्पद्यते इति ज्ञेयम्। तस्य क्षमादिकं कारणं भवति॥

## षष्ठं सोपानं उपासनाख्यं कर्म।

उपासनं नाम यथाशास्त्रम् उपासकस्य मनसः विषयीकरणेन सामीप्यम् उपगम्य तैलधारावत् विजातीयप्रत्ययानन्तरितसमानप्रत्यय-प्रवाहेण यदासनं तदुपासनम्।

शास्त्रोक्तरीत्या उपास्यदेवताया विषयीकरणेन देवतासामीप्यमुपगम्य तैलधारावत् सन्ततं विजातीयप्रत्ययाः यथा न भवन्ति तथा कृत्वा गङ्गाप्रवाहः यथा गच्छति तथा देवताप्रत्ययप्रवाहः दीर्घकालं प्रवहेत्। तदेव उपासनम्॥ ध्येयैकनिष्ठता यथा स्यात् तथा यतेत।

अत्रापि एका कथा अनुसन्धेया।

एकस्मिन् ग्रामे कश्चन श्रोत्रियः ब्राह्मण आसीत्। तस्य पादरक्षा छिन्ना भिन्ना अभूत्। तस्याः समीकरणार्थं हरिजनवासस्थानं

गत्वा कस्यचन हरिजनस्य वशे समीकरणार्थं तां ददौ । परदिने स्नानं कृत्वा सन्ध्यानुष्ठानं कृत्वा देवतोपासनकाले तमेव हरिजनं प्रति 'अनेन पादरक्षा समीकृता वा न वा इति' मनसि चिन्तयामास । तस्मिन्नेव काले तन्मित्रं ऐश्वर्यवान् आगत्य 'गृहस्वामी वर्तते वा न वा' इति तस्य स्नुषां पप्रच्छ । सा तु 'गृहपतिः हरिजनवासस्थानं गतः' इति उच्चैस्स्वरेण उत्तरं ददौ । सोऽपि श्वशुरः तदुत्तरं श्रुत्वा कुपितः बहिरागत्य तां भर्त्सयामास । अवोचत् च— 'त्वं मां सन्ध्यानुष्ठान-कर्तारं दृष्ट्वाऽपि कथं हरिजनस्थानं गत इत्यवोचः' इति । तदा सा शान्तेन स्वरेण "तदानीं भवन्तः 'हरिजनेन पादरक्षा समीकृता वा न वा' इति आलोचनां चक्रुः किल ! तस्मात् तज्ज्ञात्वा अहं हरिजन-वासस्थानं गताः इत्यवदम्" इत्यवोचत् । तदा श्वशुरः स्नुषायाः परोक्षज्ञानं ज्ञात्वा त्वमेव मम गुरुः इत्युक्त्वा तां श्लाघयामास ॥

इदन्तु उपासनं न भवति । उपासनकाले उपासनं विहाय मनः अन्यत्र गतम् । विजातीयप्रत्ययान्तरितमेव अभूत् ।

भगवान् एवमुवाच गीतासु—

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥ इति ।

मनसः बुद्धेश्च वृत्तिः परमात्मविषयिणी एव भवेदित्यर्थः ॥ तदानीमेव तदुपासनं भवति । एकदेवताविषयिण्येव सन्ततमनोवृत्तिः

उपासनाख्या भवति, फलाय कल्पते । शतगजखननेन वापी भवति । एकत्र एकगजखननम् अन्यत्र अन्यगजखननम् इति भिन्नभिन्नस्थले एकै-कगजखननेन शतगजखननेऽपि यथा वापी न भवति । तथा भिन्नभिन्न-देवताप्रत्ययः उपासनं न भवति । फलाय न कल्पते । उपासनफलं तु भावनया ध्येयैकनिष्ठता । ध्येयैकनिष्ठत्वे ध्येयदेवताश्रितलक्षणः अस्यापि आविर्भवन्ति । भावनया देवो भूत्वा देहपातानन्तरं देवो भवति । ध्येयदेवतानन्दानुभवं जाते आनन्दरूपे परमात्मनि प्रीतिः जायते । परमात्मनि परमप्रीतिरेव भक्तिः ॥

सप्तमं सोपानं भक्तियोगः ।

नारदभक्तिसूत्रे भक्तिस्वरूपम् एवं वर्णितम्– 'सा त्वस्मिन् परमप्रेमरूपा' भगवति परमप्रेमरूपा भक्तिरित्यभिधीयते ।

भगवद्भक्तेन प्रह्लादेन एवमुक्तम्–

'या प्रीतिरविवेकानां विषयेष्वनपायिनी ।

त्वामनुस्मरतस्सा मे हृदयान्मापसर्पतु ॥ इति ।

अविवेकिनाम् आत्मानात्मनोः विवेकरहितानाम् अविवेकिनां पुत्रेषु, दारेषु, गृहेषु, धनेषु च या स्थिरा प्रीतिर्वर्तते, हे भगवन् ! त्वाम् अनुस्मरतः मे सा त्वयि नित्या, स्थिरा प्रीतिः मम हृदयात् मापसर्पतु हृदये स्थिरा भवतु इति ।

भगवति प्रेम्णः विघ्नकारकं विषयप्रेम । स एव काम इति उच्यते । कामत्यागे भक्तिर्भवति ।

यथा शिशुः अन्यान् त्यक्त्वा मातरमेव वृणुते तदैव माता तं कराभ्यां गृहीत्वा समादधाति, नो चेत् माता तत्पुरतः क्रीडार्थं पुत्तिकां काञ्चित् स्थापयित्वा कर्म कर्तुं गच्छति । ममेति विषयेषु विद्यमानं कामं निगृह्य भगवत्येव प्रेम स्थापयेच्चेत् सा परमात्मप्रीतिरेव भक्तिः ॥

प्रतिबन्धकनिवृत्तिरेव शास्त्रेषु साधनमित्युच्यते । भक्तेः प्रतिबन्धकः काम एव । तस्य निवृत्तिरेव साधनमित्युच्यते शास्त्रेषु । एकपुत्रजनने पुत्रे या प्रीतिः वर्तते दशपुत्रजननेऽपि सर्वेऽप्यपि समाना प्रीतिः मातुर्वर्तते । न्यूना न भवति । तस्मात् प्रीतिः विभागं कर्तुं न शक्या । प्राणिमात्रस्य प्रेम सहजं वर्तते । माता कुक्कुटी स्वशावकेषु अन्यादृशं प्रेम दर्शयति । सिंह्यपि तच्छावके अन्यादृशीं प्रीतिं दर्शयति । अतः सर्वेषां प्राणिनां पुरुषाणां स्त्रीणां च समाना प्रीतिः वर्तते । किन्तु सा विषयेषु समर्पिता भवति । सा सहजा प्रीतिर्भगवति गुरौ निक्षिप्ता चेत् सैव भक्तिरित्यभिधीयते ॥

अष्टमं सोपानं प्रपत्तिः ।

श्रीमद्रामायणे एवमुक्तम्—

सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥ इति ।

यः विद्यमानं स्वकित्वमेव परमात्मनि निवेदयति समर्पयति तादृशनिवेदनं प्रपत्तिरित्युच्यते । सर्वात्मना भगवति स्वात्मसमर्पणं प्रपत्तिरित्युच्यते । अद्वैतिभिरपि एतादृशात्मनिवेदनम् अङ्गीक्रियते ।

प्रपत्तिसमर्थार्थे: Surrender इत्युच्यते ।

भगवद्गीतायाम् उक्तम्—

ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥ गी. १८–६१

तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥ गी १८–६२

परमात्मा सर्वेषां हृदये वर्तते । तस्मात् तं शरणं गन्तुं सुलभं भवति । तस्मात् तमेव शरणं गच्छ, तत्प्रसादात् तदनुग्रहात् परां शान्तिं शाश्वतं स्थानं च प्राप्स्यसि इति । तमेव इत्यवधारणेन अन्यान् विहाय भगवन्तमेव शरणं भज इत्यर्थः ॥

भागवते सप्तमस्कन्धे प्रह्लादेनोक्तम्—

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥ भा. ७–२३

इति नवविधा भक्तिः प्रह्लादेनोक्ता अत्रानुसन्धेया ॥

नवमं सोपानं अन्तरङ्गसाधनम् श्रवणमनननिदिध्यासनानि ।

बृहदारण्यके 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति वदति । कस्यचिद्विरक्तस्य आत्मानात्मविवेकिनः श्रवणमात्रेणैव आत्मज्ञानम् उत्पद्यते चेत् तदनन्तरं तस्य मनननिदिध्यासनयोः आवश्यकता नास्ति । फलस्य ज्ञानस्य प्राप्तत्वात् । यस्य तु प्रतिबन्धकवाहुल्येन श्रवणमात्रेण आत्मज्ञानं न जायते, तस्य मनननिदिध्यासनयोरप्यावश्यकता वर्तते । यस्य तु श्रवणमननाभ्यामेव आत्मज्ञानं जायते तस्य निदिध्यासनं नावश्यकम् । यस्य तु श्रवणमननाभ्याम् आत्मज्ञानं न जायते, तस्य श्रवणमनननिदिध्यासनानि आवश्यकानि भवन्ति । ज्ञानस्य दृष्टफलत्वात् यावज्ज्ञानं न जायते तावत्साधनानि अनुष्ठेयान्येव । ज्ञानजनने तु ततःपरं साधनानां समाप्तिरेव भवति । यावत्पर्यन्तं तृप्तिर्न भवति तावत्पर्यन्तं भोजनम् आवश्यकम् । तृप्तिर्जाता चेद्भोजनस्य समाप्तिरेव । भोजनस्य तृप्त्यर्थत्वात् । समुद्रं द्रष्टापि श्रवणमनननिदिध्यासनानां दर्शनार्थत्वात् दर्शने जाते श्रवणादीनामपेक्षा नास्ति ॥

शान्तो दान्त उपरतस्तितिक्षुस्समाहितो भूत्वा आत्मन्येव आत्मानं पश्येदि'त्युपनिषदुक्त्यनुसारेण शान्तिः मनोनिग्रहः, दान्तिः इतरसर्वेन्द्रियनिग्रहः । उपरतिः कर्मानुष्ठानान्निवृत्तिः । तितिक्षा शीतोष्णसुखदुःखादिद्वन्द्वसहनम् । समाधानं चित्तविक्षेपाभावः । इत्यादीनि च अन्तरङ्गसाधनानि । मुमुक्षुणा एतानि अनुष्ठेयान्येव ॥

दशमं तु सोपानं विचारजन्यम् आत्मज्ञानम् ।

'अवगतिपर्यन्तं ज्ञानं ज्ञानशब्दस्य अर्थः' इति भाष्यकारैः (सू. भा. १-१-१) उक्तम् । अनुभवावसानं ज्ञानं = ज्ञानमित्यर्थः ।

यथा लोके द्रष्टृचक्षुषः आलोकेन संयोगः यत्कालः तत्काले एव रूपाभिव्यक्तिः । एवम् आत्मविषयं ज्ञानं यत्कालं तत्काले एव तद्विषयाज्ञानतिरोभावस्स्यात् । अतो ब्रह्मविद्यायां सत्याम् अविद्याकार्यानुपपत्तिः, प्रदीप इव तमः इति ॥ बृहदारण्यकभाष्ये १-४-१०

ब्रह्मविदाप्नोति परम् । यत्कालं ब्रह्मज्ञानं तत्काले ब्रह्मप्राप्तिः । स्वस्वरूपत्वात् ब्रह्मप्राप्तेः ॥ —तैत्तिरीये

तत्त्वमसि ॥ —छान्दोग्योपनिषत् ६-८-७

'प्रत्यक्षफलत्वाच्च ज्ञानस्य फलविरहप्रज्ञानुपपत्तिः । कर्मफले हि स्वर्गादौ अनुभवानारूढे स्यादप्याशङ्का भवेद्वा न वा इति । अनुभवारूढं तु ज्ञानफलं यत्साक्षादपरोक्षाद्ब्रह्म ( बृह. ३-४-१ ) इति श्रुतेः । तत्त्वमसि इति च सिद्धवदुपदेशात् । न हि तत्त्वमसि इत्यस्य वाक्यस्य अर्थः तत्त्वं मृतो भविष्यसि इत्येवं परिणेतुं शक्यः । तद्धैतत्पश्यन् ऋषिः वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च ( बृह.१-४-१० ) इति च सम्यग्दर्शनकाल एव तत्फलं सर्वात्मत्वं दर्शयति । तस्मादैकान्तिकी विदुषः कैवल्यसिद्धिः' ॥ (सू. भा. ३-३-३२)

ज्ञानम् उपासनं द्वे अपि अन्तःकरणवृत्ती एव । तत्र ज्ञानं वस्तुतन्त्रम् । वस्तु यथा विद्यते तथैव अन्तःकरणवृत्तिः भवेत् । उपासनं तु पुरुषतन्त्रम् । पुरुषेण कर्तुम् अकर्तुम् अन्यथा वा कर्तुं शक्यम् । यथा पद्भ्यां गच्छति । अन्येन वा गच्छति न वा गच्छति इति पुरुषमत्यनुसारेण भवति ॥

व्यवहारे वस्तुतन्त्रं ज्ञानं क्रियाङ्गं भवति । अत्र तु वस्तुतन्त्रं ज्ञानं स्वतन्त्रमेव फलदायकं भवति । यथा 'दध्ना जुहोति' इत्यत्र दधिज्ञानं वस्तुतन्त्रं किन्तु जुहोतिक्रियायाः अङ्गं भवति । एवमेव उपासनायाम् उपास्यदेवताज्ञानमपि वस्तुतन्त्रम्, किन्तु उपासनाङ्गभूतं भवति ॥ ब्रह्मज्ञानं तु स्वातन्त्र्येण फलाय कल्पते इति विशेषः । संसारदुःख-निवृत्तिः आनन्दस्वरूपेण अवस्थानं च ज्ञानसमकाले एव भवतः ॥

कठोपनिषदि एवमुक्तम्—

नायमात्मा प्रवचनेन लभ्यः न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥

यमेव भगवन्तमेव यः वृणुते साधकः तेन भगवान् लभ्यः । अयं भगवान् प्रवचनेन न लभ्यः । मेधया न लभ्यः । बहुना श्रुतेनापि न लभ्यः । यः भगवन्तमेव वृणुते तेन लभ्यः ॥

यदा भूतपृथग्भावम् एकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म सम्पद्यते तदा ॥ गी. १३–३०

भिन्नभिन्नानि भूतानि एकस्मिन् ब्रह्मण्येव वर्तन्ते इति पश्यति । एतानि सर्वाणि परमात्मन एव जातानि परमात्माव्यतिरिक्तानि इति च यदा पश्यति, यः कोऽपि यस्मिन् समये एवं अनुभवेन जानाति, तत्काल एव ब्रह्मभावं लभते । अत्र ज्ञानमात्रेण ब्रह्मभावप्राप्तिरूपं फलं वर्णितम् ॥

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ गी. ४–३५

यद् ज्ञात्वा यद् ज्ञानं तैरुपदिष्टं अधिगम्य= प्राप्य, पुनः= भूयः मोहं एवं यथा इदानीं मोहं गतोऽसि पुनः एवं न यास्यसि, हे पाण्डव । किंच येन ज्ञानेन भूतानि अशेषेण ब्रह्मादीनि स्तम्बपर्यन्तानि द्रक्ष्यसि साक्षादात्मनि प्रत्यगात्मनि मत्संस्थानि इमानि भूतानि इति । अथो अपि मयि वासुदेवे परमेश्वरे च इमानि इति - क्षेत्रज्ञेश्वरैकत्वं सर्वोपनिषत्प्रसिद्धं द्रक्ष्यसि इत्यर्थः ॥

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डितास्समदर्शिनः ॥ गी. ५–१८

पण्डा = आत्मज्ञानं येषां सञ्जातं ते पण्डिताः, आत्मज्ञानिनः। विद्याविनयसम्पन्ने ब्राह्मणे, गवि, हस्तिनि, शुनि, श्वपाके च समदर्शिनः सर्वं ब्रह्मरूपेणैव पण्डिताः पश्यन्ति। ते तु ब्रह्मव्यतिरिक्तं किञ्चिदपि न पश्यन्ति इत्यर्थः॥ निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः इति उत्तरश्लोके समदर्शनस्य ब्रह्मार्थकत्वं भगवतैवोक्तम्॥

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥ गी. १८–६६

सर्वधर्मान् नित्यनैमित्तिककाम्यरूपाणि सर्वाणि कर्माणि निषिद्धकर्माणि च कर्तृत्वभोक्तृत्वं च परित्यज्य = त्यक्त्वा मामेकं शरणं व्रज= आत्मनः परमार्थस्वरूपेण तिष्ठ। सर्वधर्माधर्मपरित्यागस्तु प्रमातृत्वत्यागेनैव भवति। प्रमातृत्वे सत्वे धर्माधर्मानुष्ठानं वर्तत एव। तेषां त्यागः न सम्भवति। अतः आत्मन्यध्यस्तं प्रमातृत्वं ज्ञानेन बाधित्वा स्वस्य परमार्थरूपेण तिष्ठ इत्यर्थः। प्रमातृत्वं तु देहः अहमेव; इन्द्रियाणि मम इति देहेन्द्रियादिषु अहंममाभिमानरूपम्। तद्रहितस्य प्रमातृत्वं नोपपद्यते। अनात्मसु देहेन्द्रियादिषु अहंममाभिमानः मिथ्याज्ञानं खलु। तस्मान्मिथ्याज्ञानं सम्यग्ज्ञानेन बाधित्वा स्वस्य परमार्थस्वरूपेण तिष्ठ इत्यर्थः। मिथ्याज्ञानकल्पितप्रमातृत्वापगमे स्वस्वरूपेण सच्चिदानन्दस्वरूपेणैव तिष्ठति इत्यर्थः। स्वरूपावस्थानरूपं मोक्षं प्राप्स्यसि इत्यर्थः॥

स्वप्नान्तं जागरितान्तं च उभौ येनानुपश्यति ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥ कठ. २-१-४

येन साक्षिस्वरूपभूतेन आत्मना स्वप्नान्तं जागरितान्तं च उभौ अनुपश्यति, शास्त्राचार्योपदेशमनुसृत्य पश्यति, सः महान् आत्मा विभुश्च सर्वव्यापकः इति तं महान्तं सर्वव्यापकम् आत्मानं स्वात्मत्वेन मत्वा धीरो न शोचति । स्वस्य आत्मा महान् सर्वव्यापकः इत्येवं विदित्वा न शोचति इत्यर्थः ॥

अन्यः देवः महान् सर्वव्यापकः अहं तु परिच्छिन्नः इति ज्ञाने अस्य शोकाभावे किं कारणम् ? न किमपि कारणमस्ति । शोकाभावस्तु फलम् अत्र वर्ण्यते । अतः स्वस्यैव आत्मा महान् सर्वव्यापकः इत्येव जानीयात् । तेन हि ज्ञानेन तत्फलं स्वस्वरूपावस्थानरूपम् अनुभवति । किञ्च स्वप्नस्थजीवः जाग्रज्जीवः इति उभौ अत्र कर्मभूतौ यः द्रष्टा स साक्षी स एव स्वस्य आत्मा चेत् उभावपि द्रष्टुं शक्नोति । स्वप्नस्थजीवः जाग्रस्थितजीवश्च देहाद्युपाधिविशिष्टौ जाग्रज्जीवः स्वप्नं न पश्यति, स्वप्नस्थजीवः जाग्रच्च पश्यति । उभेऽप्यवस्थे द्रष्टुं समर्थः निरुपाधिकः शुद्धः आत्मा । स एव हि विभुः सर्वव्यापकः । स एव अस्य पारमार्थिक आत्मा चेत्, तम् आत्मत्वेन वेत्ति चेत् तस्य शोकाभावः सङ्गतो भवति । शोकाभाववान् अन्यश्चेत् अस्य शोकाभावः कथं स्यात् ? न शोचति इति अस्यैव शोकाभावः उच्यते । तस्मात् आत्मा

च ब्रह्म इत्येव विजानीयात् । तेन ज्ञानेन ब्रह्मप्राप्तिरूपं फलं सञ्जातं भवति । ज्ञानसमकाल एव ब्रह्मप्राप्तिर्भवति ॥

लोकास्समस्तास्सुखिनो भवन्तु ।

स्वात्मस्वरूपावस्थानस्य मोक्षत्वे सर्वदा सर्वेषां मोक्ष एव स्यात् । न बन्धः । बन्धस्तु दृश्यते अनुभूयते च । स्वरूपम् अहेयम् अनुपादेयम्, स्वरूपस्य बाह्यः प्रतिबन्धकः न सम्भवति । स्वरूपस्य अन्तः बाह्यवस्तुनः प्रवेशः सर्वथा न शक्यः । बाह्यवस्तुनः प्रवेशाङ्गीकारे स्वरूपस्यैव हानिस्स्यात् इति चेत् । शृणु बन्धस्य कारणं, बाह्यं वस्तु न भवति । स्वात्मनः ब्रह्मस्वरूपत्वं सदा विद्यत एव, तथापि तत् अज्ञात्वा बद्ध इव भवति । अज्ञानन्तु ब्रह्मात्मैक्यज्ञानादेव बाध्यते । न कर्मणा कर्मसहितेन उपासनेन वा बाध्यते । स्वरूपावस्थानस्यैव मोक्षत्वेऽपि अज्ञातत्वज्ञातत्वविशेषाभ्यां बन्धमोक्षौ सिद्धतः[1] । अत एव इदं ज्ञानशास्त्रमिति जैमिनिधर्ममीमांसाशास्त्रं कर्मशास्त्रमिति पृथक्शास्त्रं भवति ॥

समस्तसन्मङ्गलानि भवन्तु ॥

---

(१) एकैव हि मुक्त्यवस्था ॥ सू. भा. ३-४-५२
विवेकविज्ञानफलं स्वरूपेण अभिनिष्पत्तिः ॥ सू.भा.१-३-१९
केवलात्मस्वरूपावगतिः ॥ सू. भा. १-३-१९
स्वरूपावस्थानमेव कैवल्यम् ॥ गी. भा. १८-६६

॥ ॐ ॥

आत्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

छान्दोग्योपनिषत्पष्ठाध्यायसंग्रहः—

पूर्वाध्यायेषु 'उपासका देहत्यागानन्तरं कार्यब्रह्मलोकं देवयानेन पथा गत्वा तत्र ब्रह्मणा सह तत्त्वविचारेणात्मज्ञानं लब्ध्वा मुक्ता भवन्ति, तत्त्वज्ञानलाभाभावे पुनरावर्तन्ते इति । यज्ञादिधर्मकार्यरताः देहत्यागानन्तरं पितृयानेन स्वर्गादीन्गत्वा तत्रानन्दमनुभूय पुण्यक्षयानन्तरं पुनर्मनुष्यलोकं प्रत्यागच्छन्ति' इति चोक्त्वा देहेन्द्रियादिसङ्घाते अहमित्याकारकमिथ्याज्ञानसत्त्वपर्यन्तं कर्ता भोक्ता भवतीत्युक्त्वा अयं देहेन्द्रियादिसङ्घातोऽपि ब्रह्मैव, यतः एतत्सर्वं ब्रह्मण एव उत्पद्य ब्रह्मण्येव स्थित्वा ब्रह्मण्येव लीनं भवति इत्युक्त्वा विश्वरूपेण परिदृश्यमानं इदं जगदद्वितीयं ब्रह्मैवेति जानीयात् । एवमद्वितीयमात्मानम् अधिगच्छन् ब्रह्मज्ञानी एकस्मिन्तृप्ते सर्वं जगत् तृप्यति इति चोक्तम् ॥

इदानीं षष्ठाध्याये सर्वं जगत्कथं ब्रह्मणः जायते ? कथं ब्रह्मण्येव तिष्ठति ? कथं वा ब्रह्मण्येव लीयते ? इत्येतत्, कथं विदुषि एकस्मिन्तृप्ते सर्वं जगत्तृप्यति ? इत्येतच्चात्मैकत्वे एव सम्भवति आत्मनानात्वे न सम्भवति । अतः परमार्थत आत्मैकत्वं कथमुपपद्यते इत्येतच्च अत्र प्रतिपाद्यते ।

श्वेतकेतुर्नाम कश्चन बालकस्सकलवेदशास्त्राण्यधीत्य आत्मानं सर्वशास्त्रज्ञं मत्वा पितरम् आरुणिम् उद्दालकम् अहंकारेणोपससार ।

पिताऽऽरुणि: 'अयि पुत्र, कस्मिन् विदिते सर्वमिदं विदितं भवति, इत्येतज्जानीषे' ? इत्यपृच्छत् । श्वेतकेतुः कथमिदं सङ्गच्छते ? 'असम्भवमिदं' इति मत्वा 'एकस्मिन्विदिते अन्यत्कथं विदितं भवति' ? इत्यपृच्छत् । पिताऽवदत्, 'मृत्तिकां विजानन् मृत्तिकाकार्याणि घटस्थाल्यादीनि मृत्त्वेन जानाति, वाचारम्भणं विकारो नामधेयम् । मृत्तिकेत्येव सत्यम्' । विकारास्सर्वे नामधेयमात्राणि उपादानकारणमेव सत्यम् । सर्वस्य आत्मजन्यत्वात् । एवंप्रकारेण आत्मैकएव सत्यः, तज्जन्यम् अन्यत्सर्वम् अनृतम् । तस्मात् आत्मन्येकस्मिन्विदिते सर्वमिदं विदितं भवति ॥

पुत्र, कथमात्मनो जगज्जातमित्यादीनि कथयामि, शृणु । इदं जगदिदानीं यथा नामरूपात्मकं व्यक्तं प्रकाशते, तथा प्रकाशात्पूर्वम् इदं केवलसद्रूपमेवासीत् । सद्रूपं नाम सत्तामात्रं ब्रह्मैव, आत्मा च ब्रह्म ॥

स्वात्मनोऽतिरिक्तम् उपादानकारणं किंचन नासीत् । तस्मात्स्वयमेव ब्रह्मात्मा बहुभवनाय आलोचयामास । स एव तेजः अभवत् । तेजोरूपस्स एव आपोऽभवत् । अब्रूपस्स एव पृथिवी बभूव । तेजः, आपः, पृथिवी, इमानि त्रीणि मिलित्वा अण्डजानि स्वेदजानि जीवजानि उद्भिज्जानि भवन्ति । भूतत्रयसङ्घाताज्जाते देहेन्द्रियादि-

सङ्घाते प्रतिबिम्बितः आत्मा जीव इति व्यवहृतः ॥ स व्यक्तनामरूपाणि विभज्य ज्ञेयानीति सङ्कल्प्य तथैवाकरोत् । अग्नौ स्थिता रक्तता सूक्ष्मतेजस्सम्बन्धिनी । अग्नौ स्थिता श्वेतता सूक्ष्मजलस्य सम्बन्धिनी । अग्नौ स्थिता कृष्णता सूक्ष्मभूमिसम्बन्धिनी । यदा इमास्तिस्रस्संकल्प्यन्ते तदाग्निरिति तं व्यवहराम: । यदा इमास्तिस्रः विभज्यन्ते तदाऽग्निरिति व्यवहर्तुं नास्त्येव सः । एवमेव सर्वाणि वस्तूनि भूतत्रयरूपाणि भवन्ति । भूतत्रयविभागावस्थायां न सन्त्येव तानि सर्वाणि भूतानि ॥ भूतत्रयादेवास्मद्देहोऽपि जातः । पृथिव्यास्सारो मनः । जलस्य सारः प्राणः । तेजसस्सारो वाक् । यदा इमानि त्रीणि भूतानि प्रत्येकं विभज्यन्ते । तदा देह इति पदार्थः नास्त्येव ॥

सद्रूपं ब्रह्मैव उपाधिवशात् जीव इति व्यवह्रियते इत्येतद्विषये श्रद्धाप्राप्त्यर्थं जीवस्य यदा कदा वा ब्रह्मस्वरूपेणावस्थितिर्दर्शयितव्येति पिता आरुणिः पुत्रस्य सुषुप्त्यनुभवं परामृश्य उवाच, 'भो श्वेतकेतो, 'सुषुप्त्यनुभवं मनसि विचारय' । अत्र जीवो जगत्कारणभूतसद्रूपे ब्रह्मणि लीनो भवति । तदेव च अस्य जीवस्य पारमार्थिकं स्वरूपम् । तस्मादेव कारणादस्य स्वपितीति नाम लोके प्रसिद्धम् ॥

यथा कश्चन पक्षी स्वबन्धनाद्दिशं दिशं पतित्वाऽन्यत्रायतनम् अलब्ध्वा स्वाश्रयमेवोपसम्पद्य सुखी भवति, आनन्दी भवति । एवमेव अयं जीवो जाग्रत्स्वप्नयोर्नानाविधसुखदुःखान्यनुभूय श्रान्तः तच्छ्रमाप-नुत्त्यै सुषुप्तिं गच्छति । कदापि हातुमशक्यं सद्रूपं ब्रह्म स्वयमेव

भवतीत्येतदेव कारणं तदानुभूतानन्दस्य । सद्रूपं ब्रह्मैव सर्वं भवति । तदेव सर्वस्यात्मा तदेव त्वमसि ॥

इदानीं कार्यकारणभावमालोचयामः । अयं देहः, इन्द्रियाणि, मनश्च भूतानां कार्याणि । भूतानि सूक्ष्मभूतानां कार्याणि । भूतेषु पृथिव्याः आपः कारणम् । अपां तेजः कारणम् । तेजसः सत् कारणम् । सत् न कार्यम् । सदेव सर्वदा वर्तते । तस्मात् कार्यम् । तस्य अन्यत्कारणं नास्ति, तस्य अकार्यत्वात् । अतः सदेव जगत्कारणम् । अत एव सर्वमिदं जगत्सदेव । सदेवात्मा । तदेकमेव अद्वितीयम् । परमार्थतस्सदेव त्वमसि । सर्वे त्वं वयं च सुषुप्तौ सति सम्पन्ना भवामः । यदि वयं सर्वेऽपि सत्सम्पन्नाः, वयं सत्सम्पन्ना इति अनुभवः किमर्थं नास्ति ? शृणु तत्र कारणम् ॥

यदा यथा मधुकृतः नानावृक्षाणां पुष्पाणां च रसानादाय एकतां 'मधु' इति गमयन्ति तदा अयं अस्य वृक्षस्य रसः । अयं एतत्पुष्पस्य रसः इति ज्ञातुं न शक्यते । एवमेव वयं सर्वेऽपि बाह्यप्रपञ्चेन सह सुषुप्तौ ब्रह्मणा सह एकतां गताः । अतो वयं तत्र सद्रूपतां गता इत्यतः ज्ञातुं न प्रभवामः । अस्तु । जाग्रति वयं देहेन मनसा च सह वर्तामहे खलु ! इदानीं सतो वयमागच्छाम इति स्मरणं किमर्थं नास्ति ? शृणु तस्य कारणम् । स्मृतेरनुभवजन्यसंस्कारजन्यत्वात् तत्र सुषुप्तौ 'वयं सति सम्पन्नाः' इत्यनुभवाभाव एव कारणम् । अनुभवजीवः सतो व्यतिरिक्तो नासीत् । किन्तु सोऽपि सर्वविशेषरहिते सद्रूपे

एकतां गतः, सदेवासीत् । तदा कथं कस्य विशेषानुभवो जायेत ! अनुभवाभावे स्मृतिः कथमुत्पद्यते !

समुद्रं गतास्समुद्रे लीना भिन्ना भिन्ना नद्यः पुनस्तत्तद्रूपेण नागच्छन्ति खलु । तद्विरुद्धत्वेन सुषुप्तौ सद्रूपे ब्रह्मणि लीनो जीवो जाग्रति स एव तेनैव रूपेण कथमागच्छति इति ! शृणु तत्र कारणम् । जीवस्सदा ब्रह्मस्वरूप एव । अयं ब्रह्मणो नान्यः । देहाद्युपाधीनामभावेऽपि जीवो न नश्यति । ब्रह्मस्वरूपेण वर्तत एव । देहेन्द्रियाद्युपाध्यागमने पुनर्जीव इति व्यवह्रियते । उपाधयस्तु अविद्याकल्पिताः । सुषुप्तिगमनात्पूर्वं अविद्या विद्यया न बाधिता । अतः अविद्यासत्त्वे देहेन्द्रियाद्युपाधयोऽपि आगच्छन्ति । ततः जीव इति व्यवह्रियते । स्वस्य स्वरूपं ब्रह्मणस्स्वरूपं च एकीकृत्य जाग्रति 'अहं सुप्तोऽभवम् । सुखमहमस्वाप्सं न किञ्चिदवेदिषम्' इति व्यवहरति ।

नामरूपरहितान्निरवयवात् सूक्ष्मात्सद्रूपान्नामरूपात्मकं सावयवं स्थूलं जगत् कथमुत्पन्नमिति संशयस्स्यात् । 'न हि दृष्टेऽनुपपन्नं नाम' । सुषुप्ते ऐक्यमनुभूतम् । जाग्रति विशेषरूपश्च अनुभूयते । एतादृशानुभवे विद्यमाने कथमेतत् स्यादिति सन्देहो निरर्थकः, दृष्टत्वात् । अतिसूक्ष्माया वटकणिकाया महान् वटवृक्षो दृश्यते । दृष्टे कथमिति प्रश्नो निरर्थकः ॥

जगतस्सदेव कारणं स्याच्चेदिदानीमपि सर्वं सद्रूपेणैव दृश्येत ! न तु दृश्यत इति चेत् । दृश्यत एव । यथा लवणं जले प्रक्षिप्तं लीनं सदक्ष्णा ग्रहीतुं न शक्यते, परन्त्वाचमनेन गृह्यत एव । एवमेव न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः, तथापि शास्त्राचार्योपदेशानुसारेण आत्मरूपेणैव स्थित्वा पश्यति चेदात्मरूपेण प्रकाशत एव ॥

ये ईदृशं जगत्कारणं सद्रूपात्मानम् आत्मत्वेनानुभवन्ति तेषां जननमरणरूपोपतापाः न भवन्ति ।

ये ईदृशं ज्ञानं न लभन्ते ते अनृतं संसारमेव सत्यं मत्वा दुःखभाजो भवन्ति ॥

'नाहं स्तेन' इत्यनृतं वदतः स्तेनस्य हस्ते निक्षिप्तः अग्निः तं दहत्येव, स दुःखभाग्भवति, तथा इमं मिथ्याप्रपञ्चं सत्यमिति ये जानन्ति, ते जननमरणरूपसंसारदुःखमनुभवन्त्येव ।

सत्यनिष्ठा धर्मात्मानः परैरध्यारोपितस्तैन्याः हस्तनिक्षिप्ताङ्गाराः अपि समाहितचित्तास्सुखिनो भवन्ति ॥

एवमेव ये 'सद्रूपात्माहमि'ति सद्रूपात्मानमात्मत्वेन अनुभवन्ति ते निर्दुःखाः परमानन्दपूर्णा भवन्ति ॥

॥ शिवं भवतु ॥

# परिशिष्टम्

## सन्यासिनां कर्मानुष्ठानं नास्ति

परमहंससंन्यासिनां नित्यनैमित्तिककर्मानुष्ठानं नास्ति ।

–गीताभाष्यावतरणिका ३–१

अथ गृहस्थस्यैव आयासबाहुल्यकारणात् मोक्षः स्यात् नाश्रमान्तराणाम्, श्रौतनित्यकर्मरहितत्वात् इति । तदप्यसत् । सर्वोपनिषत्सु इतिहासपुराणयोगशास्त्रेषु च ज्ञानाङ्गत्वेन मुमुक्षोः सर्वकर्मसंन्यासविधानात् । आश्रमविकल्पसमुच्चयविधानाच्च श्रुतिस्मृत्योः ॥

सिद्धस्तर्हि सर्वाश्रमिणां ज्ञानकर्मसमुच्चयः । न । मुमुक्षोः सर्वकर्मसंन्यासविधानात् । इति ॥

अस्मिन् वाक्ये संन्यासिनां श्रौतकर्म वा स्मार्तकर्म वा नास्ति इति स्पष्टम् उक्तम् ॥

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ गीताभाष्यम् ६–३

भाष्यम्– योगारूढस्य पुनस्तस्यैव शमः उपशमः सर्वकर्मभ्यो निवृत्तिः कारणं योगारूढस्य साधनमुच्यते इत्यर्थः- इति योगारूढस्य संन्यासिनः सर्वकर्मत्यागः उक्तः ॥

तस्मात् अनात्मवित्कर्तृकयोरेव संन्यासकर्मयोगयोः निःश्रेयसकरत्ववचनं, तदीयाच्च कर्मसंन्यासात् पूर्वोक्तात्मवित्कर्तृकसंन्यास-

विलक्षणात् सत्येव कर्तृत्वविज्ञाने कर्मैकदेशविषयात् शमनियमादिसहितत्वेन च दुरनुष्ठेयत्वात् मुकरत्वेन च कर्मयोगस्य विशिष्टत्वाभिधानम् अत्र विविदिषासंन्यासिनः कर्मसंन्यासः यमनियमाद्यनुष्ठानसहितः कर्तव्यत्वेन उक्तः इति अनात्मज्ञकर्तृकसंन्यासात् कर्मयोगः विशिष्टः इति युक्तम् ॥

-गीताभाष्यम् ५-१ अवतरणिका

'परिव्राजकस्य तु सर्वकर्मसंन्यासात् प्रत्यवायो न सम्भवति अननुष्ठाननिमित्तः । शमदमादिस्तु तदीयधर्मो, ब्रह्मसंस्थतायाः उपोद्बलको न विरोधी ॥ ब्रह्मनिष्ठत्वमेव हि तस्य शमदमाद्युपबृंहितं स्वाश्रमविहितं कर्म' इति ॥

सूत्रभाष्यम्- ३-४-२०

अत्र संन्यासिनां सर्वकर्मत्यागः उक्तः । ब्रह्मनिष्ठया अविरुद्धं शमदमादिकम् अस्त्येव इत्युक्तम् ॥

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ गी.भा. १८-५२

विविक्तसेवी अरण्यनदीपुलिनगिरिगुहादीन् विविक्तान् देशान् सेवितुं शीलमस्य इति विविक्तसेवी । लघ्वाशी लघ्वशनशीलः । विविक्तसेवालघ्वशनयोः निद्रादिदोषनिवर्तकत्वेन चित्तप्रसादहेतुत्वात् ग्रहणम् । यतवाक्कायमानसः- वाक् च कायश्च मानसं च यतानि संयतानि यस्य ज्ञाननिष्ठस्य सः ज्ञाननिष्ठः यतिः यतवाक्कायमानसस्स्यात् ।

एवमुपरतसर्वकरणस्सन् ध्यानयोगपरः ध्यानं आत्मस्वरूपचिन्तनं, योगः आत्मविषये एकाग्रीकरणम्, तौ परत्वेन कर्तव्यौ यस्य सः ध्यानयोगपरः । नित्यं नित्यग्रहणं मन्त्रजपाद्यन्यकर्तव्याभावदर्शनार्थम् इति ॥

अत्र मन्त्रजपादयोऽपि कर्मसिद्धिं प्राप्तस्य मुमुक्षोः (संन्यासिनः) न सन्ति इत्युक्तम् ॥

(१) अतः संन्यासिनः श्रौतकर्माणि वा स्मार्तकर्माणि वा न सन्ति ।

(२) विविदिषासंन्यासिनः कर्मनिषेधः योगमात्रानुष्ठानञ्च विधीयेते ।

(३) विद्वत्संन्यासिनः पुनः ते न स्तः ।

(४) संन्यासिनः आश्रमधर्मस्य कर्म विरोधि । तस्य कर्मत्यागेन प्रत्यवायो नास्ति ।

(५) परमहंससंन्यासिनः मन्त्रजपादयोऽपि न विहिताः ।

(६) महावाक्यानि मन्त्रजपार्थानि न भवन्ति । तानि परमार्थवस्तुबोधकवाक्यानि ॥ तत्त्वमसि इत्यादीनि महावाक्यानि उपासनावाक्यानीति इति वृत्तिकारमतं खण्डितम् ॥ तस्मात् महावाक्यानि न जपार्थानि । इमानि यत्रकुत्रापि जपार्थानि इति न नियुक्तानि । अतः महावाक्यजपः संन्यासिना न कर्तव्यः किन्तु ॐकारजपः कर्तव्यः ॥

मुषुप्तौ बीजभावविशिष्टाया इव सत्सम्पत्तेर्बोधकानि वाक्यानि, तत्तात्पर्यबोधकानि च वाक्यानि अत्र संगृहीतानि ॥

(१) सः उपाधिद्वयोपरमे मुषुप्तावस्थायां उपाधिकृतविशेषाभावात् स्वात्मनि प्रलीन इवेति "स्वं ह्यपीतो भवति" इत्युच्यते ॥ सू. भा. १-१-९ पुटम् ३२-३३

## तात्पर्यम्

'प्रलीन इव' इत्यस्य 'न प्रलीनः' इत्यर्थं कर्तुं अत्र न शक्यते, अत्रैव 'स्वं ह्यपीतो भवति' इत्युक्तत्वात् ॥ जीवः सदा ब्रह्मैव ॥ जीव इति उपाधिना विशिष्टः अंशैरर्थवशतः ॥ मुषुप्तौ उपाधेरुपशान्तत्वात् प्रलीन इव इत्युक्तम् ॥ सः यदि यदा कदा वा ब्रह्मभिन्नस्स्यात्, इदानीं ब्रह्मणि प्रलीनः इति वक्तुं शक्येत ॥ सः सदा ब्रह्मैव । अतः प्रलीन इव इति इवशब्दः प्रयुक्तः ॥ सदा ब्रह्मस्वरूपस्य मुषुप्तौ प्रलीनत्ववचनम् अयुक्तमिति ज्ञात्वा प्रलीन इवेत्युक्तम् ॥

(२) प्रलीयमानमपि चेदं जगत् शक्त्यवशेषमेव प्रलीयते ॥ सू. भा. १-३-३० पु. १३०

## तात्पर्यम्

अत्र शक्तिः का ? माया ।

तस्याः लक्षणं किम् ?        मां. का. भा. २-११ पु. ९०

या असद्रूपस्वात्मिका सद्रूपस्वात्मिकेव अवभासमाना सा माया मां. का भा. ४–५८, मायेत्यविद्यमानस्य आख्या । अविद्याकल्पिते नामरूपे . . . . प्रपञ्चबीजभूते . . . . माया, शक्तिः, प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते ॥ सू. भा. २-१-१४ पु. २०१

अविद्याकल्पितेन . . . . व्याकृताव्याकृतात्मकेन ॥

सू. भा. २–१–२७ पु. २१३

## तात्पर्यम्

अविद्याकल्पिता शक्तिः अविद्यायां प्रलीयते । मुषुप्तौ तस्याः स्थितिः नैव सम्भवति । अत एव जगत्प्रलयः अविद्यायाम् उक्तः ॥ अध्यासस्य आगमने सापि शक्तिः नियमेन आगच्छति ॥ अध्यासस्तु सम्यग्ज्ञानेन बाधपर्यन्तं स्वत एव गच्छति, स्वत एव आगच्छति । अध्यास एव अविद्या ।

(३) प्रलीनमपि इदं जगत् शक्त्यवशेषमेव प्रलीयते ॥

सू. भा. १–३–३० पु. १३०

## तात्पर्यम्

अत्र शक्तिः का ? अविद्याकल्पिता माया । प्रलयकाले सा कुत्र स्थातुं शक्या ? यया कल्पिता तस्यां स्थातुं शक्या नान्यत्र ॥ अविद्याकल्पिता अविद्यायां वर्तते, न मुषुप्तौ । या यस्याः कार्यं सा तस्यामेव लीयते, नान्यत्र ॥ मुषुप्तौ जगत्प्रलयः कथं स्यात् ? अविद्याकल्पितस्य जगतः अविद्यायामेव प्रलयो युक्तः ॥ अत्रैव प्रलीनत्वमुक्तम् ॥

(४) सुषुप्तिसमाध्यादावपि, सत्यां स्वाभाविक्यां अविभागप्राप्तौ मिथ्याज्ञानस्य अनपोदितत्वात् पूर्ववत्पुनः प्रबोधे विभागो भवति ॥　　　सू. भा. २-१-९१ पु. १९१

## तात्पर्यम्

सुषुप्तिसमाध्यादौ स्वाभाविकी अविभागप्राप्तिरिति अत्रैव उक्ता । मिथ्याज्ञानस्य अनपोदितत्वमपि उक्तम् ॥ मिथ्याज्ञानं नाम अध्यासः ॥ सः ज्ञानेन न बाधितः ॥ मिथ्याज्ञानम् ( अध्यासः ) बाधपर्यन्तं स्वयमेव गच्छति, स्वयमेव आगच्छति । सुषुप्तिः सर्वैरनुभूयते । सुषुप्तौ सर्वैरपि अद्वितीयः आत्मैव अनुभूयते । अनुभवविरुद्धस्य वाक्यस्य अनुभवानुसारेण एव अर्थः कर्तव्यः ॥ अनुभवविरुद्धोऽर्थः न समीचीनार्थः ॥ अनुभवस्तु स्वाभाविकी अविभागप्राप्तिः ॥ अत्र एका कथा अनुसन्धेया । काचन वृद्धा रात्रौ दीपरहिते स्वगृहे सूचीं पातयामास ॥ प्रदीपयुक्तायां वीथ्यां तां विचिनोति स्म ॥ कश्चन दयालुः पान्थः "वृद्धायाः सहायः कर्तव्यः" इति मत्वा वृद्धां 'किं विचिनोषि ?' इति पप्रच्छ । सा तु 'सूचीं विचिनोमि' इति जगाद ॥ स तु 'सूची कुत्र पतिता ?' इति पुनः पप्रच्छ ॥ सा तु स्वगृहे पतिता इत्यब्रवीत् ॥ स तु 'गृहे पतितां सूचीं अत्र किमर्थं विचिनोषि ?' इति पुनः पप्रच्छ । सा तु 'गृहे दीपो नास्ति, अत्र प्रदीपः वर्तते । अतः अत्र विचिनोमि' इत्यवदत् । स तु गृहे पतितां सूचीं अत्र विचिन्वन्त्याः वृद्धायाः बुद्धिकौशलं स्वमनसि गणयन् 'वृद्धे, गृहं गच्छ,

गृहे पतिता सूची अत्र लब्धुं कथं शक्यते !' इत्युक्त्वा ययौ ॥ तद्वत् अध्यासकल्पितां मायां शक्तिं वा अध्यासं विहाय सुषुप्तौ तत्स्थितिं पश्यतां जनानां विवेकः वृद्धाविवेकसदृश एव इति ज्ञेयम् ॥

(५) मिथ्याज्ञानपुरःसरोऽयम् आत्मनो बुद्ध्युपाधिसम्बन्धः । न च मिथ्याज्ञानस्य सम्यग्ज्ञानादन्यत्र निवृत्तिरस्तीत्यतः यावद्ब्रह्मात्मतानवबोधः तावदयं बुद्ध्युपाधिसम्बन्धः न शाम्यति ॥
सू. भा. २-३-३० पु. २८८

## तात्पर्यम्

मिथ्याज्ञानं नाम अध्यासः, अध्यासकल्पितः बुद्ध्युपाधिसम्बन्धः, न वस्तुभूतः ॥ अतो न दोषः । अध्यासकल्पितः अध्यासे वर्तते । नान्यत्र सुषुप्तौ । अयमपि बुद्धिसम्बन्धः शक्त्यात्मना विद्यमान एव सुषुप्तप्रलययोः पुनः प्रबोधप्रसवयोराविर्भवति ॥

(६) एवं हि एतद्युज्यते । न ह्याकस्मिकी कस्यचित् उत्पत्तिः सम्भवति । अतिप्रसङ्गात् । दर्शयति च सुषुप्तादुत्थानं अविद्यात्मकबीजसद्भावकारितम् ॥ 'सति सम्पद्य न विदुः सति सम्पद्यामहे' इति ॥ सू. भा. २-३-३१ पु. २८९.

## तात्पर्यम्

मिथ्याज्ञानम्= अध्यासः ॥ तस्य बीजं= कारणम् अग्रहणम् । मिथ्याज्ञानकल्पितः बुद्धिसम्बन्धः इत्यनेन वस्तुतः बुद्धिसम्बन्धो नास्तीति

ज्ञायते ॥ अग्रहणमेव शक्तिः ॥ अग्रहणं यावद्ब्रह्मात्मताऽनवबोधः तावन्न शाम्यति ॥

(७) सुषुप्तप्रलययोः बीजभावावशेषैव एषा सत्सम्पत्तिः ॥

सू. भा. ४-२-८ पु. ४८३

## तात्पर्यम्

एषा सत्सम्पत्तिः = इत्यनेन सत्सम्पत्तिरुक्ता । बीजभावः कः ? अग्रहणमेव बीजभावः । तच्च तत्त्वज्ञानोत्पत्तिपर्यन्तं न बाध्यते ॥ अग्रहणमेव बीजम् इत्युक्तम् ॥ तथा च सत्सम्पत्तिर्विद्यते, सत्सम्पत्तेः पूर्वं ज्ञानेन अग्रहणं न बाधितमित्यर्थः ॥

(८) इह तु विद्यते कर्म च अविद्या च इति ॥

सू. भा. ३-२-९ पु. ३५३

## तात्पर्यम्

अविद्या नाम अध्यासः । सुषुप्तौ अध्यासः अग्रहणरूपेण विद्यत एव । कर्म = अध्यासकल्पितम् । यावत्पर्यन्तं अध्यासः सम्यग्ज्ञानेन न बाध्यते तावत्पर्यन्तम् अध्यासः, अध्यासकल्पितं कर्म च अग्रहणरूपेण विद्येते एव ॥

(९) आत्मनः सद्रूपताम् अज्ञात्वैव सत्संपद्यन्ते ॥

छां. ६-९-३ पु. ३६७

## तात्पर्यम्

अत्रापि सत्सम्पत्तिः आक्षिप्ता । आत्मनः सद्रूपतां जानति ज्ञात्वा सत्सम्पत्तिः एका, आत्मनः सद्रूपतां जानति अज्ञात्वा सत्सम्पत्तिः अन्या । द्वयोरपि सत्सम्पत्तिः विद्यत एव ॥ ज्ञात्वा सत्सम्पत्तौ न पुनर्जीवभावः भवति, अज्ञात्वा सत्सम्पत्तौ पुनर्जीवभावः भवति, अयमेव विशेषः ।

(१०) बीजात्मकताऽभ्युपगमात् सतः ।

मां. का. भा. २२ पु. ३०

## तात्पर्यम्

अग्रहणमेव अत्रापि बीजम् । तत्तु सुषुप्ते नास्ति, अन्तःकरणे वर्तते । अन्तःकरणं अध्यासकल्पितम् । अध्यासेन सह गच्छति, अध्यासेन सह आगच्छति ॥

(११) सुषुप्ते अन्यः प्रकारः अविद्यामोहतमोग्रस्तस्य अन्तर्लीनानेकानर्थप्रवृत्तिबीजवासनावतः मनसः ॥

मां. का. भा. ३-३४ पु. १४२

## तात्पर्यम्

अविद्याकल्पितमनसि सर्वानर्थप्रवृत्तिबीजं वर्तते । मनश्च अविद्याकल्पितम् । अविद्या ज्ञानेनैव बाध्या, नान्यैः ॥ अविद्यासत्वे अविद्याकल्पितं सर्वं वर्तत एव । अत्रैव मनसः अविद्याकल्पितत्व-मुक्तम् ॥

(१२) शुद्धम् , निर्मलं – अविद्यामलवर्जितमिति कारणशरीर-प्रतिषेधः ॥　　　ई भा. १–८, पु. ४

## तात्पर्यम्

तत्त्वग्रहणाभाव एव कारणशरीरम् ॥
स तु ग्रहणाभावः सम्यग्ज्ञानेन न बाधितः इत्यर्थः ॥

## परिशिष्टम्

"सुषुप्तौ जीवः परेण ब्रह्मणा एकतां गच्छति" इत्यर्थ-प्रतिपादकानि भाष्यवाक्यानि अत्र संगृहीतानि ॥

(१) सता सोम्य तदा सम्पन्नो भवति ॥

सू. भा. १-३-१५ पु. १०९

(२) लोकेऽपि किल गाढं सुषुप्तम् आचक्षते ब्रह्मीभूतो ब्रह्मतां गतः इति ॥ सू. भा. १-३-१५ पु. १०९

(३) सम्प्रसादशब्दोदितं जीवं "स्वेन रूपेण अभिनिष्पद्यते" इति ब्रह्मस्वरूपापन्नं दर्शयन् न परस्मात् ब्रह्मणः अमृताभयस्वरूपात् अन्यं जीवं दर्शयति ॥ सू. भा. १-३-१९ पु. ११४

(४) सुषुप्तौ तावदयं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तः न बाह्यं किंचन वेद नान्तरम् ॥

सू. भा. १-३-४२ पु. १४३; बृ. पु. ६०८ ४-३-२१

(५) सुषुप्तिकाले च परेण ब्रह्मणा जीवः एकतां गच्छति ॥

सू. भा. १-४-१८ पु. १६८

(६) संप्रसादे च प्रपञ्चपरित्यागेन सदात्मना सत्संपत्तेः निष्प्रपञ्च-सदात्मत्वम् ॥ सू. भा. २-१-६ पु. २८९

(७) सुषुप्तावस्थायां चेतने अप्ययं दर्शयति ॥

सू. भा. १-१-९ पु. ३३

(८) सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्यां अविभागप्राप्तौ ॥

सू. भा. २-१-९ पु. १९१

(९) सुषुप्तं प्रकृत्य यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति न हि द्रष्टुर्दृष्टेः विपरिलोपो विद्यते अविनाशित्वात् न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत् ॥

सू. भा. २-३-१८ पु. २८१

(१०) आत्मा तच्छ्रमापनुत्तये स्वम् आत्मानं परं ब्रह्म प्रविश्य विमुक्तकार्यकरणसंघातः अकर्ता सुखी भवति संप्रसादावस्थायाम् ॥

सू. भा. २-३-४० पु. २९३

(११) नाडीद्वारेणैव ब्रह्मण्येवावतिष्ठते इति प्रतीयते ॥

सू. भा. ३-२-७ पु. ३४९

(१२) सप्तमीनिर्देशोऽपि तत्र वाक्यशेषे दृश्यते सति सम्पद्य न विदुः सति संपद्यामहे इति ॥

सू. भा. ३-२-७ पु. ३४९

(१३) तत्रापि द्वारमात्रं नाड्यः पुरीतच्च । ब्रह्मैव त्वेकं सुषुप्तिस्थानम् ॥

सू. भा. ३-२-७ पु. ३५०

(१४) सुप्तावस्थायां कदाचित् सता सम्पद्यते कदाचिन्न सम्पद्यते इति अयुक्तम् ॥

सू. भा. ३-२-७ पु. ३५०

(१५) तत्र सति सम्पन्नस्तावन् तदेकत्वात् न विजानाति इति युक्तम् ॥ सू. भा. ३-२-७ पु. ३५१

(१६) स्वप्नजागरितयोस्तु उपाधिसंपर्कवशात् पररूपापत्तिमिव अपेक्ष्य तदुपशमान् सुषुप्ते स्वरूपापत्तिर्वक्ष्यते ॥

सू. भा. ३-२-७ पु. ३५१

(१७) आत्मैव सुप्तिस्थानम् ॥

सू. भा.३-२-७ पु. ३५१

(१८) (सुषुप्तौ) सः परे आत्मनि सम्प्रतिष्ठते ॥

प्रश्न. पु. ४४,४९

(१९) (सुषुप्तौ) यत्र अविद्याकामकर्माणि न सन्ति ॥

बृह. ४-३-२१ पु. ६०५

(२०) (सुषुप्तौ) अभयं रूपं अविद्यावर्जितम् ॥

बृह. ४-३-२१ पु. ६०६

(२१) (सुषुप्तौ) वस्त्वन्तरस्य प्रत्युपस्थापिका अविद्या प्रविविक्ता ॥ बृह. ४-३-२१ पु. ६०८

(२२) (सुषुप्तौ) अविद्याया अभावात् आत्मकामम् ॥

बृह. ४-३-२१ पु. ६०९

(२३) अविद्याकामकर्मविनिर्मुक्तमेव तद्रूपं यत्सुषुप्ते आत्मनो दृश्यते प्रत्यक्षतः ॥ बृह. ४-३-२२ पृ. ६१०

(२४) यद्वै सुषुप्ते तन्न पश्यति पश्यन्वै तन्न पश्यति । न तु तद्‌द्वितीयमस्ति यद्विभक्तं पश्येत् ॥

बृह. ४-३-२३ पृ. ६१७

(२५) वस्त्वन्तरप्रत्युपस्थापिका अविद्या सुषुप्ते शान्ता ॥ बृह. ४-३-३२ पृ. ६२६

(२६) अविद्यया हि द्वितीयः प्रविभज्यते, सा च सुषुप्ते शान्ता ॥ बृह. ४-३-३२ पृ. ६२६

(२७) अविद्याकामकर्मादिसर्वसंसारधर्मातीतं रूपमस्य साक्षात् सुषुप्ते गृह्यते ॥ बृह. ४-३-३४ पृ. ६३३

(२८) सम्प्रसादस्थानं मोक्षदृष्टान्तभूतम् ॥ बृह. ६-४-३४ पृ. ६३४

(२९) यो हि सुषुप्तावस्थमिव निर्विशेषं अद्वैतं आत्मानं पश्यति सः ब्रह्म भवति ॥ बृह. ४-४-६ पृ. ६६०

(३०) यस्माच्चैवं आत्मनः सद्रूपतां अज्ञात्वैव सत्सम्पद्यन्ते तस्मात् सत्प्रविष्टा अपि तद्भावेनैव पुनराविर्भवन्ति ॥ छा. ६-९-३ पृ. ३६७

(३१) सुषुप्ते एव स्वं देवतारूपं जीवरूपविनिर्मुक्तं दर्शयिष्यामि ॥ छा. ६-८-१ पु. ३५६

(३२) न ह्यन्यत्र सुषुप्तात् स्वं अपीतिं जीवस्य इच्छन्ति ब्रह्मविदः ॥ छा. ६-८-१ पु.३५६

(३३) यत आह-- सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति इति स्वशब्देन आत्मा अभिलप्यते स्वरूपं आपन्नः सुप्तो भवतीत्यर्थः । अपि च न कदाचिज्जीवस्य ब्रह्मणा सम्पत्तिर्नास्ति: स्वरूपस्य अनपायित्वात् स्वप्नजागरितयोस्तु उपाधिसम्पर्कवशात् पररूपापत्तिमिव अपेक्ष्य तदुपशमात् सुषुप्ते स्वरूपापत्तिर्विवक्ष्यते अतश्च सुषुप्तावस्थायां कदाचित्सता सम्पद्यते कदाचिन्न सम्पद्यते इति अयुक्तम् ॥

सू. भा. ३-२-७ पु. ३५१

(३४) आत्मनः श्रमाभावं सुषुप्तौ प्राज्ञेनात्मना संपरिष्वक्तस्य श्रावयति ॥ सू. भा. २-३-४० पु. २९३

भाष्ये सुषुप्तौ बीजसद्भावबोधकानीव वाक्यानि संगृहीतानि । तेषामाशयश्च प्रकाशितः ॥

(१) सः उपाधिद्वयोपरमे सुषुप्तावस्थायां उपाधिकृतविशेषाभावात् स्वात्मनि प्रलीन इवेति "स्वं ह्यपीतो भवति" इत्युच्यते ॥

सू. भा. १-१-९ पु. ३२,३३

जीवः ब्रह्मणि सदा प्रलीन एव । एकत्वात् उपाधिकृतविशेषेण जीवः इत्युच्यते । सुषुप्तौ उपाधिकृतविशेषाभावात् इति हेतुः तत्रैव उक्तः । सदाप्रलीनस्य कथं इदानीं प्रलीनत्वं उच्यते इति चेत् उच्यते उपाधिविशिष्टस्य अप्रलीनत्वमिव, उपाधिरहितस्य प्रलीनत्वमिव च योतयितुं प्रलीन इवेत्युच्यते सदा प्रलीन एव । तत्रोक्तश्रुतावेव स्वं ह्यपीतो भवति इत्युक्तम् ॥

(२) प्रलीयमानमपि इदं जगत् शक्त्यवशेषमेव प्रलीयते । अत्र शक्तिः का ? जगद्बीजमेव ॥ जगद्बीजं किम् ? अध्यासकारणं अज्ञानमेव अज्ञानकल्पितं बीजं अज्ञाने वर्तते ॥

सू. भा. १-३-३० पु. १३०

कार्यं कारणं विना अन्यत्र न वर्तते, अतः बीजं अज्ञाने एव वर्तते, न सुषुप्तौ ॥ अज्ञानं स्वयमेव यदा गच्छति तदा तत्कल्पितं

बीजमपि गच्छति। यदा अज्ञानं स्वयमेव आगच्छति तदा बीजमपि आगच्छति। तत्त्वज्ञानेन अज्ञानं यदा बाध्यते तदा पुनर्नागच्छति, तदा तत्कल्पितबीजमपि नागच्छति ॥

(३) सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्यां अविभागप्राप्तौ मिथ्याज्ञानस्य अनपोदितत्वात् पूर्ववत् पुनः प्रबोधे विभागो भवति ॥

सू. भा. २–१–९. पु.१९१

अविभागप्राप्तिः स्वाभाविकी इति अत्रैवोक्तम्। स्वाभाविकस्य अन्यथा कर्तुं न केनापि शक्यते। तस्मात् स्वाभाविकी अविभागप्राप्तिः सुषुप्तौ अस्त्येव। अध्यासकल्पितः विभागः अध्यासेन सह गच्छति, अध्यासेन सह आगच्छति। तत्त्वज्ञानेन अध्यासे बाधिते तत्कल्पित-विभागोऽपि बाध्यते तावत्पर्यन्तं विभागः पुनः पुनः अध्यासेन सह आगच्छत्येव ॥

(४) अयमप्यात्मनो बुद्ध्युपाधिसम्बन्धः शक्त्यात्मना विद्यमान एव सुषुप्तप्रलययोः पुनः प्रबोधप्रसवयोराविर्भवति ॥

सू. भा. २–३–३१ पु. २८९.

मिथ्याज्ञानपुरस्सरोऽयं आत्मनो बुद्ध्युपाधिसम्बन्धः, न च मिथ्याज्ञानस्य सम्यग्ज्ञानादन्यत्र निवृत्तिरस्ति इत्यतः यावद्ब्रह्मात्मता-नवबोधः तावदयं बुद्ध्युपाधिसम्बन्धो न शाम्यति।

सू. भा. २–३–३० पु. २८८

मिथ्याज्ञानं = अध्यासः मिथ्याज्ञानपुरस्सरः । अध्यासपुरस्सरः ।

अयं बुद्ध्युपाधिसम्बन्धः = अध्यासकल्पितः अयं सम्बन्धः । अध्यासमत्त्वे अस्यापि सत्त्वम् । अध्यासाभावे बुद्ध्युपाधिसम्बन्धाभावः । शक्तिः बीजं = अध्यास एव । अध्यासरूपेण अध्यासकल्पितं सर्वं जगदेव वर्तते । न सुषुप्तात्मके ब्रह्मणि । प्रबोधप्रसवयोः अध्यासः आगच्छति । बुद्ध्युपाधिसम्बन्धोऽपि आगच्छति ॥ अध्यासस्तु तत्त्वज्ञानेनैव बाध्यते नान्येन ॥

(५) इह तु विद्यते विवेककारणं कर्म च अविद्या च इति । सुषुप्तौ कर्म विद्यते किम् ! न विद्यते इति सर्वानुभवः ।

सू. भा. ३-२-९ पु. ३५३

अतः 'इह' इत्यस्य 'सुषुप्ते' इति न अर्थः । इह इत्यस्य 'अध्यास' इत्यर्थः । अध्यासकल्पितं सर्वं अध्यासे वर्तते । सुषुप्तौ केवलात्मस्वरूपस्थितेः किं बाधकम् ! न किमपि बाधकमित्यर्थः । इह अविद्या वर्तते इति तत्रैवोक्तम् । यावत्तत्त्वज्ञानाभावः तावदविद्या वर्तत एव अविद्या मनसः वृत्तिरूपा । तस्मात् अविद्या मनसि वर्तते । मनस्तु अध्यासे वर्तते । अध्यासकल्पितत्वात् । अध्यासस्थितं मनः अन्यत् प्राणिसामान्यं तत् । अध्यासकल्पितमनोवृत्तिरूपाविद्या अन्या ॥

(६) मिथ्याज्ञाननिमित्तश्च बन्धः न सम्यग्ज्ञानादृते विस्रंसितुमर्हति, तस्मात् तत्प्रकृतिन्येऽपि सुषुप्तप्रलयवत् बीजभावावशेषैव एषा

सत्सम्पत्तिरिति ॥

मू. भा.४–२–८ पु. ४८३

बीजम्= अध्यासकारणं अज्ञानं अध्यासनिमित्तश्च बन्धः । अध्यासस्तु सम्यग्ज्ञानादेव बाध्यते । इदानीं सम्यग्ज्ञानं न जातम् । तस्मात् अध्यासः न बाधितः । तस्मादेव अध्यासनिमित्तः बन्धोऽपि न बाधितः इत्यर्थः । एतेन सुषुप्तौ बीजम् नास्त्येवेत्यर्थः ।

(७) आत्मनः सद्रूपताम् अज्ञात्वैव सत्सम्पद्यन्ते ॥

छां. ६–९–३ पु. ३६७

अग्रहणं बीजम्, अग्रहणं = मनोवृत्तिः । मनस्तु अध्यास-कल्पितम् । अध्यासकल्पितं अध्यासनिष्ठं, न सन्निष्ठम् । तस्मात् सत्सम्पत्तेः बाधको नास्ति ॥ अध्यासकल्पितं मनः अन्यत् । अध्यास-कल्पितं जीवनिष्ठं मनः अन्यत् ॥

(८) निर्बीजतयैव चेत् सति लीनानां सम्पन्नानां सुषुप्तप्रलययोः पुनरुत्थानानुपपत्तिः स्यात् ॥

मां. का. भा. १–२ पु. ३०

अत्रैव सति लीनानां सम्पन्नानामिति सत्सम्पत्तिरुक्ता । बीजं तु अग्रहणम् । तत् ज्ञानेन न बाधितम् । तस्मात् अस्त्येव बीजं, तत् सुषुप्तौ ब्रह्मरूपं नास्ति तत्लादनोषः ॥

(९) सुषुप्ते अन्यः प्रचारः अविद्यासहितस्य मनसः ।

मां. का. भा. ३–३४ पु. १४२

अविद्या = अध्यासः । सः तत्त्वज्ञानेन न बाधितः इत्यर्थः । अध्यासे सति अध्यासकल्पितः सर्वोऽपि वर्तत एव । तत्त्वज्ञाने जाते अध्यासः बाध्यते । तत्त्वज्ञानप्राप्तिपर्यन्तं अध्यासः वर्तत एव ॥

(१०) शुद्धं = निर्मलं = अविद्यामलवर्जितम् । इति कारणशरीरप्रतिषेधः ॥

ईशावास्य भा १–८ पु. ४

कारणशरीरम् अग्रहणं तन् ब्रह्मणि नास्ति मनसि वर्तते ।

(११) बीजात्मकत्वाभ्युपगमात् सतः ॥

मां. का. भा. १–२ पु. ३०

बीजम = अग्रहणरूपा अविद्या ॥

## भाष्यकारोक्तमायास्वरूपप्रतिपादकवाक्यानि संगृहीतानि ।

(१) स्वप्नश्च माया च स्वप्नमाये असद्रूपस्वात्मिके सद्रूपस्वात्मिके इव लक्ष्येते अविवेकिभिः ।

मां. का. भा. २–३१; पु. ९०

(२) सा च माया न विद्यते ।
मायेत्यविद्यमानस्य आख्या ।

मां. का. भा. ४–५८; पु. १९६

(३) सर्वज्ञस्य ईश्वरस्य आत्मभूते इव अविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यां अनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञेश्वरस्य माया, शक्तिः, प्रकृतिरिति च श्रुतिस्मृतोरभिलप्येते ।

सू. भा. २–१–१४ पु. २०१

(४) अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते । पारमार्थिकेन च रूपेण सर्वव्यवहारातीतं अपरिणतमवतिष्ठते ॥

सू. भा. २–१–२७

(५) तत्र कल्पितरूपप्रत्याख्यानेन ब्रह्मणः स्वरूपावेदनमिति निर्णीयते । तदास्पदं हि इदं समस्तं कार्यं नेति नेतीति प्रतिषिद्धम् ॥

सू. भा. ३-२-२२; पृ. ३६५

(६) अविद्यात्मिका हि बीजशक्तिः । अव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुप्तिः । यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः ॥

सू. भा. १-४-३; पृ. १४०.

(७) एवं अविद्याकृतनामरूपोपाध्यनुरोधी ईश्वरो भवति । स च स्वात्मभूतानेव अविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसङ्घाता-नुरोधिनः जीवाख्यान् विज्ञानात्मनः प्रतीष्टे व्यवहारविषये ॥

सू. भा. २-१-१४; पृ. २०१

(८) अविद्यात्मकोपाधिपरिच्छेदापेक्षमेव ईश्वरस्य ईश्वरत्वं सर्वशक्तित्वं च ।

सू. भा. २-१-१४; पृ. २०१

(९) अविद्यात्मकनामरूपबीजव्याकरणापेक्षत्वात् सर्वज्ञत्वस्य ॥

सू. भा. २-१-१४; पृ. २००

(१०) उपाधीनां अविद्याप्रत्युपस्थापितत्वात् ॥

सू. भा. ३-२-११; पृ. ३५६

(११) माया त्रिगुणात्मिका अविद्यात्मका प्रकृतिः ॥
भ. गी. भा. ९-१० पु. २०६

(१२) प्रकृतिं स्वां । भाष्ये अविद्यात्मकाम् ।
भ. गी. भा. ९-८ पु. २०४

(१३) सर्वो ह्ययं व्यक्ताव्यक्तलक्षणमहासंसारः अविद्याविषयः ।
बृह. भा. १-५-२ पु. २०६

(१४) अविद्यालक्षणादव्यक्तात् ॥
भ. गी. भा. ८-२० पु.१९६

(१५) स्वभावः अविद्यालक्षणा प्रकृतिः, माया ।
भ. गी. भा. ५-१४ पु.१३५

(१६) अहंकार इति अविद्यासंयुक्तं अव्यक्तम् ॥
गी. भा. ७-४ पु. १७३

(१७) अज्ञानजं अविवेकतः जातं मिथ्याप्रत्ययलक्षणं मोहान्धकारं तमः ॥ गी. भा. १०-११

(१८) यथा मायाविना विहिता माया गगनम् अतिविमलं कुसुमितैः सपलाशैः तरुभिः आकीर्णमिव करोति तथा इयमपि देवस्य माया ॥ मां. का. भा. २-१९

सूत्रभाष्ये २–१–१४, २–१–२७, ३–२–२२ त्रिषु स्थलेषु नामरूपलक्षणायाः मायायाः अविद्याकल्पितत्वं स्पष्टमुक्तम् । अतः यत्र अविद्यालक्षणान्, अविद्यात्मकान्, अविद्याकृतात् इत्यादि-शब्दाः प्रयुज्यन्ते तत्र सर्वत्र मायायाः प्रकृतेः एकत्वात् अविद्या-कल्पितात् इत्येव ज्ञेयम् ॥

भाष्यकाराणाम् अभिप्रायानुसारेण अध्यास एव मुख्या अविद्या वार्तिककाराणाम् अभिप्रायानुसारेण अग्रहणमेव मुख्याविद्या-इत्यर्थबोधकानि वाक्यानि अत्र संगृहीतानि ।

(१) तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते ॥

सू. भा. अध्यासभाष्यम्

(२) अस्यानर्थहेतोरध्यासस्य प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते ॥

सू. भा. अध्यासभाष्यम्

(३) देहादिषु अनात्मसु अहमस्मीति आत्मबुद्धिः अविद्या ॥

सू. भा. १-३-२ पु. ९१

(४) मोहस्तु विपरीतप्रत्ययप्रभवः अविवेको भ्रमः । स च अविद्या सर्वस्य अनर्थस्य प्रसवबीजम् ॥

बृ. भा. ३-५-१ पु. ४५३

(५) विपरीतज्ञानान्तरव्यवधानापोहार्थत्वात् ज्ञानस्य ॥

बृ. भा. १-४-७ पु. १४५

(६) यदि ज्ञानाभावः, यदि संशयज्ञानं, यदि विपरीतज्ञानं वा उच्यते अज्ञानमिति सर्वं हि तत् ज्ञानेनैव निवर्त्यते ॥

बृ. ३-३ पु. ४२५

(७) अविद्याकामकर्मविनिर्मुक्तमेव तद्रूपं यत्सुषुप्ते आत्मनो गृह्यते प्रत्यक्षतः इति ॥

बृ. भा. ४–३–२२ पु. ६१०

(८) इदमविद्यायाः स्वरूपमुक्तं भवति । सर्वात्मानं सन्तं असर्वात्मत्वेन ग्राहयति । आत्मानम् असर्वं आपादयति । आत्मनोऽन्यद्वस्त्वन्तरं अविद्यमानं प्रत्युपस्थापयति ॥

बृ. भा. ४–३–२० पु. ६०४

(९) अविद्यायाः विपरीतज्ञानात् ॥

प्रश्न भा. ६–६

(१०) ज्ञात्वा विमुच्यते इति सामर्थ्यात् ......................... श्रोत्राद्यात्मभावं परित्यज्य ॥

केन भा. १–२ पु. ८

(११) आत्मस्वरूपानिश्चयहेतोः अविद्यया कल्पिताः इति पिण्डीकृतोऽर्थः ॥

मां. २–२८

(१२) अवगमानर्थक्यमपीति चेन्न अनवगमनिवृत्तेः दृष्टत्वात् ॥

बृ. भा. १–४–१० पु. १५५

(१३) न हि कश्चित् साक्षाद्वस्तुधर्मस्यापोढ्री द्रष्टा कर्त्री वा ब्रह्मविद्या । अविद्यायास्तु सर्वत्रैव निवर्तिका दृश्यते ॥

सू. भा. १-४-१० पु. १५३

(१४) अविद्या विपरीतग्राहकः संशयोपस्थापकः अग्रहणात्मको वा, विवेकप्रकाशभावे तदभावात् ॥

गी. भा. १३-२ पु. २८२

(१५) नामरूपाद्यनात्माध्यारोपणनिवृत्तिरेव कार्या ॥

गी. भा. १८-५० पु. ४१६

(१६) आत्मनि अवगते, देहादिसङ्घाते अहंप्रत्ययः बाध्यते ॥

गी. भा. १८-६६ पु. ४३८

(१७) क्रियाकारकफलभेदबुद्धिरविद्या आत्मनि नित्यप्रतता ॥

गी. भा. १८-६६ पु. ४३८

(१८) दृश्यते हि एकत्वज्ञानादेव अनवगमनिवृत्तिः ॥

सू. भा. १-४-१० पु. १५५

(१९) अज्ञानमिथ्यासंशीतिव्यतिरेकेण नापरं प्रत्यर्थिमेयविषये मानस्येहास्ति किंचन ॥

वार्तिका पु. ७८९

## संन्यासविचारः अनुवृत्तः (पृ. ७६ तः)

संन्यासिनः श्रौतस्मार्तकर्माणि न सन्ति ॥

सिद्धन्तर्हि सर्वाश्रमाणां ज्ञानकर्मणोः समुच्चयः । न । मुमुक्षोः सर्वकर्मसंन्यासविधानात् पुत्रैषणायाः वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय अथ भिक्षाचर्यं चरन्ति ।

गी. भा. ३-१

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ।

इत्याद्याः श्रुतयः ।

तस्मात्परमहंसपारिव्राज्यमेव व्युत्थानलक्षणम् प्रतिपद्येताऽऽत्म-विदसर्वकर्मसाधनपरित्यागरूपम् ॥

बृ. ३-५-१ पृ. ४६०

कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ।
तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥

शान्तिपर्व मोक्षधर्म २४१-७

यज्ञोपवीतं वेदांश्च सर्वं तद्वर्जयेद्यतिः ॥ इति श्रुतेः ।

यत्पुनरुक्तं यर्तमानापदेशाद्‌र्थवादमात्रमिति । न ॥ औदुम्बर

यूपादिविधिसमानत्वाददोषः ॥ व्युत्थाय भिक्षाचर्यं चरन्तीत्यनेन पारिव्राज्यं विधीयते ॥

बृ. भा. ३-५-१ पु. ४६०

पारिव्राज्याश्रमे च यज्ञोपवीतादिसाधनानि विहितानि । लिङ्गं च श्रुतिभिःस्मृतिभिश्च । अनन्तरं नैयित्वा अन्यस्माद्व्युत्थानं एषणात्वेऽपि इति चेन् । न । विज्ञानसमानकर्तृकात्परिव्राज्याद्देषणाव्युत्थानलक्षणात् पारिव्राज्यान्तरोपपत्तेः । यदि तदेषणाभ्यो व्युत्थानलक्षणं पारिव्राज्यं, तदात्मज्ञानाङ्गं आत्मज्ञानविरोध्येषणापरित्यागरूपत्वात् । अविद्याविषय-त्वादेषणायाः । तद्व्यतिरेकेण चास्ति आश्रमरूपं पारिव्राज्यं ब्रह्मलोका-दिफलप्राप्तिसाधनं यद्विषयं यज्ञोपवीतादिसाधनविधानं लिङ्गविधानं च ॥

संन्यासाश्रमविरुद्धं कर्म । कर्मत्यागेन तस्य प्रत्यवायो न भवति ॥

सू. भा. ३-४-२०

परिव्राजकस्य तु तदीयो धर्मो ब्रह्मसंस्थताया उपोद्बलको, न विरोधी । ब्रह्मनिष्ठत्वमेव हि तस्य शमदमाद्युपबृंहितं स्वाश्रमविहितं कर्म । यज्ञादीनि चेतरेषां, तद्व्यतिक्रमे च तेषां प्रत्यवायः ।

परमहंससंन्यासिनः मन्त्रजपादयोऽपि न विहिताः ॥

महावाक्यानि जपे न विनियुक्तानि, तानि वस्तुबोधकवाक्यानि ॥

सू. भा. १-१-४

संपदादिरूपे हि ब्रह्मात्मैकत्वविज्ञाने अभ्युपगम्यमाने तत्त्वमसि (छा. ६–८–७) अहं ब्रह्मास्मि (बृ. १–४–१०) अयमात्मा ब्रह्म (बृ. २–५–१९) इत्येवमादीनां वाक्यानां ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरः पदसमन्वयः पीड्येत ॥

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।

मुण्डक २–२–८

इति चैवमादीन्यविद्यानिवृत्तिफलश्रवणान्युपरुध्येरन् ॥

ब्रह्म वेद ब्रह्मैव भवतीति चैवमादीनि तद्भावापत्तिवचनानि संपदादिपक्षे न सामञ्जस्येनोपपद्येरन् । तस्मान्न संपदादिरूपं ब्रह्मात्मैकत्वविज्ञानम् ॥ अतो न पुरुषव्यापारतन्त्रा ब्रह्मविद्या । किं तर्हि प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवद्वस्तुतन्त्रा । एवंभूतस्य ब्रह्मणस्तज्ज्ञानस्य च न कयाचिद्युक्त्या शक्यः कार्यानुप्रवेशः कल्पयितुम् । न च विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः ॥

"अन्यदेव तद्विदितादथो अविदितादधि"    केन १–४

इति विदिक्रियाकर्मत्वप्रतिषेधात् । तथोपास्तिक्रियाकर्मत्वप्रतिषेधोऽपि भवति ॥

"यद्वाचानभ्युदितं येन वागभ्युद्यते"    केन १–५

इत्यविषयत्वं ब्रह्मणउपन्यस्य तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते इति ॥

यत्पुनरुक्तं श्रवणात्पराचीनयोर्मनननिदिध्यासनयोर्दर्शनाद्विधिशेषत्वं ब्रह्मणो न स्वरूपपर्यवसायित्वमिति । न । अवगत्यर्थत्वात् मनननिदिध्यासनयोः । यदि ह्यवगतं ब्रह्म अन्यत्र विनियुज्येत भवेत्तदा विधिशेषत्वम् । न तु तदस्ति, मनननिदिध्यासनयोरपि श्रवणवदवगत्यर्थत्वात् । तस्मान्न प्रतिपत्तिविधिविषयतया शास्त्रप्रमाणकत्वं ब्रह्मणः संभवति इत्यतः स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकं, वेदान्तवाक्यसमन्वयादिति सिद्धम् ॥ सू. भा. १–१–४

# मूलाविद्याविमर्शनम्

विद्यालङ्कारः, वेदान्तविशारदः, महामहोपाध्यायः इत्युपाधिधारिभिः गुरुकुलभारतीनिलयसंस्थापकैः त्रिलिङ्गविद्यापीठाध्यक्षैः ब्रे. ब्र. श्री. मुदुगोड वेङ्कटरामशास्त्रिभिः गृहस्थाश्रमस्थितेन विठ्ठलशास्त्रीति प्रसिद्धेन मया विरचितस्य 'मूलाविद्याभाष्यवार्तिकविरुद्धा'ख्यस्य ग्रन्थस्य समालोचनं मह्यं प्रेषितम् । तदानीमेव तस्य विमर्शनं मया पण्डितप्रकाण्डेभ्यस्तेभ्यः प्रेषितम् ॥

तत्तु मत्सन्निकटे इदानीं नास्ति । अतः नूतनं विमर्शनं इदानीं संन्यासाश्रमस्थितेन मया लिखित्वा इदं तत्त्वजिज्ञासूनां मुमुक्षूणां प्रयोजनाय भवेदिति कृत्वा अनेन शाङ्करसिद्धान्ताभ्यासग्रन्थेन संयोज्य मया मुद्रापितम् । तत्त्वजिज्ञासवः एतत् समालोचनं विमर्शनं च विलोक्य सन्तुष्टा भवेयुरिति नारायणं स्मरामि ॥

— ज्ञानानन्देन्द्रसरस्वती स्वामी

# मूलाविद्याभाष्यवार्तिकविरुद्धाख्यग्रन्थसमालोचनम्

" मूलाविद्या भाष्यवार्तिकविरुद्धा " इत्येतन्नामको ग्रन्थः ब्रह्मश्री एम्. विठ्ठलशास्त्रिभिः बेंगळूरुनिवासिभिः विरचितो मुद्रितः, प्रेषितश्च मह्यं समालोचनार्थं ८-१२-१९७५ दिने ।

त एते शास्त्रिणः वेदान्तशिरोमणिः वेदान्तविशारदः विद्यावाचस्पतिः इत्युपाधिधारिणः होळेनरसीपुरवासिनां ब्रह्मीभूत-श्री सच्चिदानन्देन्द्रसरस्वतीस्वामिनां अनुयायिनः तदीयाध्यात्मप्रकाश-कार्यालये १६९ संख्याकग्रन्थरूपेण अमुं मुद्रापयाञ्चक्रुः ॥

ते च स्वामिनः द्वादशवर्षेभ्यः प्राक् विजयवाडनगरं समागत्य श्री शृङ्गेरीशङ्करमठे अस्मदीये त्रिलिङ्गमहाविद्यापीठे, अमृतलिङ्गपीठे च अत्रत्यविद्वद्भिः गोष्ठीत्रयं अकार्षुः । तत्र च स्वामिनां मूलाविद्या-निरासप्रधानप्रमाणभूतायाः —

१) तमेतमेवं लक्षणं अध्यासं पण्डिता अविद्येति मन्यन्ते इत्येव-मध्यासभाष्यपङ्क्तौ निखिलसंसारदुःखोपलब्धिस्थानत्वेन परिदृश्यमान-स्थूलसूक्ष्मशरीरद्वयात्मककार्याध्यासो यस्सर्वानर्थहेतुः चिदात्मन्युपलभ्यते तस्मिन्प्रयुक्तमविद्यापदं किं कार्ये कारणत्वव्यपदेशात्मकं गौणं वा, किं वा अनाद्यविद्यात्मकतत्कारणशरीराध्यासम् अनङ्गीकृत्य स्थूलसूक्ष्म-

शारीरकभाष्यमात्रं अङ्गीकृत्य तत्रैव मुख्यवृत्त्या शक्त्या प्रयुक्तं वा भाष्यकृद्भिरित्येतद्विप्रतिपत्तिमनुसृत्य प्राचलद्वाक्यार्थविचारः ।

२) तत्र तमेतमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य गौणमित्येव प्रथमः पक्षः ॥

विविधश्रुतिस्मृतियुक्त्यनुभवावष्टम्भेन निखिलशाङ्करभाष्यतद्व्याख्यानोपव्याख्यानानां तदनुयायिप्राचीनाचार्यग्रन्थानां च अनुकूल इति निर्णयः प्रकटितोऽस्माभिः ब्रह्मश्री अन्नाभट्ल, वीरभद्रशास्त्री, मुदिगोंड पिच्चय्यशास्त्री, मुदिगोंड वेङ्कटरामशास्त्री, मद्दुलपल्लि माणिक्यशास्त्री, कुप्पा शिवरामशास्त्री शास्त्री, अंबटिपूडि कोन्दय्यशास्त्री, कल्गा आञ्जनेयशास्त्रीप्रभृतिभिः ( अनुमोदितः । ) । मुख्यमेवेति स्वामिना पक्षस्तु तदनुयायिमात्रपर्याप्त एवेति च ।

तत्रैवं सति पुनस्तदेव स्वामिनां मतं अनुसृत्य लिखितमुद्रितग्रन्थेऽपि श्री विठ्ठलशास्त्रिणां ग्रन्थे ततोऽधिकमस्माभिः किं वा समालोचनीयम् भवेत् ? न किमपि ।

तथापि शास्त्रिणां वादकुतूहलमनुसृत्य स्थालीपुलाकन्यायेन द्वित्रिविषयमात्रमनुसृत्य किञ्चित्समालोचनं क्रियते ॥ तथा हि ॥--

## विमर्शनम्

सूत्रव्याख्याने प्रवृत्तः भाष्यकारः सूत्रव्याख्यानं अकृत्वा किमर्थं प्रथमं अध्यासभाष्यं लिलेख ? प्रथमसूत्रे जिज्ञासापदं वर्तते । जिज्ञासा नाम ज्ञानं प्राप्तुं इच्छा । अतः ज्ञानस्वरूपं, तद्व्याप्याज्ञानस्वरूपं च निर्णेतव्यतया प्राप्ते ॥ ज्ञानाज्ञानस्वरूपनिर्णयायैव भाष्यकारः अध्यासभाष्यं प्रथमतः लिलेख ॥ तत्र तमेनं एवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते । तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः— इति अविद्याविद्ययोः स्वरूपमुक्त्वा एवमयमनादिः अनन्तः नैसर्गिकः कर्तृत्वभोक्तृत्वप्रवर्तकः अध्यासः — इति तस्य अध्यासस्य अनादित्वं नैसर्गिकत्वं च भाष्यकारः अवोचत् ॥ एतादृशाध्यासस्वरूपाविद्या गौणा अविद्येति वक्तुं नैव शक्यते । किञ्च "मुख्याविद्या मूलाविद्या" इति वक्तुं मूलाविद्या भगवत्पादैः प्रस्थानत्रयभाष्ये कुत्रापि न वर्णिता । अनुक्तायाः प्रपञ्चबीजभूतायाः अनादिभूतायाः अनिर्वचनीयवस्तुभूतायाः मुख्याविद्यात्वं कथं वक्तुं शक्यते ? अनाद्यनिर्वचनीयवस्तुभूतमूला-विद्याङ्गीकारे 'ब्रह्मैवेदमग्र आसीत्' इत्याद्यनेकाद्वैतबोधकश्रुतिवाक्य-विरोधोऽपरिहार्यः । वस्तुनः ज्ञानबाध्यत्वासम्भवात् अद्वैतहानिः । ब्रह्मणः जगत्कारणत्वहानिः । अविद्याकल्पिता माया इति वाक्यार्थस्य हानिः द्वैतापत्तिश्च = इत्येवमादिदोषाः अपरिहार्याः ॥

भाष्यकारैः स्पष्टं २–१–१५ अविद्याकल्पिते नामरूपे ...... माया; शक्तिः प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते २–१–२७

अविद्याकल्पितेन व्यक्ताव्यक्तात्मकेन ........ २-१-३१, अविद्याकल्पितरूपभेदोपन्यास इत्युक्तायाः अविद्याकल्पितायाः मायायाः मुख्याविद्यात्वं मुख्यभूताध्यासरूपाविद्यायाः गौणत्वं च न कोऽपि अङ्गीकरोति ।

३) अन्तःकरणवृत्तिकार्यं न माया ।
शास्त्रिणां ग्रन्थे तावत्

अविद्या अन्तःकरणवृत्तिरूपैव, माया तु अध्यासरूपाविद्याकल्पिता, 'सैव नामरूपबीजभूता जडशक्तिः' इत्यस्ति (५ पत्रे १८)

इत्थमत्र शास्त्रिणां ग्रन्थे मायायाः नामरूपात्मकनिखिलजगत्कारणत्वमङ्गीकृत्यापि तत्तादृशजगद्घटकान्तःकरणवृत्त्या सा माया जायते इत्युक्तिः अन्योन्याश्रयादिदोषप्रसञ्जिका न वा ?

## विमर्शनम्

अनुभवरूपाध्यासरूपाविद्याकल्पितैव माया भाष्यकारैरुक्ता ।

(१) अविद्याकल्पिते नामरूपे ........ संसारप्रपञ्चबीजभूते ........ माया, शक्तिः प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते ॥ इति ।

सू. भा. २-१-१४

(२) अविद्याकल्पितेन ........ व्याकृताव्याकृतात्मकेन ........

सू. भा. २-१-२७

(३) अविद्याकल्पितरूपभेदोऽन्यासेन ॥

सू. भा. २–३–३१

(४) कल्पितरूपप्रत्याख्यानेन इत्यादिना भाष्यकारैः अविद्या-कल्पिता माया इत्युक्तम् ॥　　　　सू. भा. ३–२–२२

(५) श्री भगवान् (गी. १३–२६)
यावत्सञ्जायते किञ्चित् सत्त्वं स्थावरजङ्गमम् ।
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥ इत्यवोचत् ।

भाष्ये = अयं अध्यासरूपः संयोगः मिथ्याज्ञानलक्षणः ॥ अध्यासाज्जगज्जायते इत्युक्तम् । मया अपि अविद्याकल्पितमायायाः जगत्कारणत्वमङ्गीकृतम् । जगद्घटकजीवान्तःकरणवृत्तिरूपा अनुभवात्मकाध्यासान्तःकरणवृत्तिरूपा नो चेत् अध्यासात् जगज्जायते इति वक्तुं कथं शक्येत ? अनुभवरूपाध्यासः सर्वप्राणिसाधारणः ॥

भाष्यकारैः (१–५) 'दृश्यते चान्यत्र एव मनो देहादिसंघाते अनात्मनि आत्मत्वाभिनिवेशो मिथ्याबुद्धिमात्रेण पूर्वेण' – इत्येतद्वाक्येन एतत् सूचितम् ॥

मायायाः अविद्याकल्पितत्वप्रतिपादकवाक्यानि मया उदाहृतानि । व्याख्यातृभिरुक्तात्मन्यपर्याधिनिर्वचनीयवस्तुभूता मायेत्यङ्गीकारे भवदुक्तदोषः प्रसज्यते, किन्तु भाष्यकारैरुक्ताविद्याकल्पितमायाङ्गीकारे दोषप्रसक्तिर्नास्ति ॥ जगद्घटकजीवान्तःकरणवृत्तेरनुक्तत्वात् ॥

४) पुत्राज्जन्म पितुर्यथा गौ. का. (४–१५)

इत्येतद्गौडपादमाण्डूक्यकारिका स्मारयति । किञ्च जीवा-न्तःकरणानां आनन्त्यात् तज्जन्यमायानामपि आनन्त्यं स्यात् ।

## विमर्शनम्

भाष्यकारैरेव अविद्याकल्पिता मायेत्युक्तम् ।

सू.भा.२-१–१४,२–१–१७,२–१–३१,३–२–२२

अध्यासात्स्थावरजङ्गमोत्पत्तिश्च प्रतिपादिता ॥ गी.भा.१३–२६

अनुभवरूपाध्यासस्वीकारात् पुत्राज्जन्म पितुर्यथा इत्यस्य संभवो नास्ति ।

भाष्यकारैः, (सू.भा. २–१–१)

तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम ।
अव्यक्तं पुरुषे ब्रह्मन्निर्गुणे संप्रलीयते ॥ इति ।

अव्यक्तस्योत्पत्तिनाशौ प्रतिपादितौ ॥

मूलाविद्यायाः कार्यं अध्यासः इति वदतां भवतां पक्ष एव पुत्राज्जन्म पितुर्यथा इत्यस्य प्रसक्तिः संभवति ॥ मया तु अनाद्यनुभव-रूपाध्यासान्तःकरणवृत्तिजन्या न केवला माया, किन्तु सर्वं जगदिद-मित्युक्तम् । नाहं मायाकार्यं अध्यासः इति भवत्पक्षम् अंगीकरोमि भाष्यकारोक्तप्रकारेण अध्यासस्य अनादित्वमेव अंगीकरोमि ॥

तस्मादस्मत्पक्षे नास्य दोषस्य प्रसक्तिः ॥

५) मायां तु प्रकृतिं विद्यान् मायिनं तु महेश्वरम् ॥

श्वे. उ. ५-४-१०

इत्यादिश्रुतिन्यायोपपत्तिभिः सर्वसंमतिप्राप्तस्य मायोपाधिकेश्वरकल्पनस्य व्याघातः स्यात् ।

## विमर्शनम्

सर्वेश्वरस्य मायाविनः मायायाः प्रकृतित्वं न संभवति । व्याख्यातृभिरुक्ता माया सर्वैर्न ज्ञाता । अतः प्रकृतिं मायां विद्यात् इत्येव तस्यार्थः । तथा महेश्वरं मायिनं विद्यात् इत्येव तस्यार्थः । नो चेत् लोकदृष्टमायाविनं महेश्वरम् इति ज्ञातुं शक्यते किम् ? नैव शक्यते ॥

अस्मत्पक्षे व्याघातो नास्ति । श्रुत्यर्थः प्रतिपादितः । अध्यासकल्पितत्वेन मायाया बहुत्वं न संभवति ।

को व्याघातः ?

न्यायोपपत्तयः भवद्भिर्नोक्ताः ।

६) कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः ॥

(शुक.र.उ.) इत्यादिश्रुत्यादिषु सुप्रसिद्धमेव ।

तथा च भाष्यपंक्तिगतं अविद्यापदं अन्तःकरणचैतन्याध्यासे प्रयुक्तं गौणमेव । तत्कारणीभूतमायायामेव मुख्यं इति च न प्रेक्षावतां परोक्षम् । अत एव विविधस्थूलसूक्ष्मजगत्कारणीभूता चिदध्यस्ता चिदावरणात्मिका कारणशक्तिर्मायेति अविद्येति अव्यक्तमिति अज्ञानमिति मूलप्रकृतिरिति गुणसाम्यमिति विविधप्रवृत्तिभिः विविधश्रुतिस्मृति-भाष्यव्याख्योपव्याख्यानप्रकरणादिषु उपलभ्यते ॥ तथा हि,

## विमर्शनम्

भाष्ये कुत्रापि अविद्या, माया इति सामानाधिकरण्येन नोक्ता ।

श्रुत्यादिषु = इति श्रुतिरुक्ता । आदिशब्दाः नोक्ताः ।

भाष्यकारैः (सू. भा. २-१-१४) अविद्याकृतनामरूपोपाध्य-नुरोधी ईश्वरः । अविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसंघातानुरोधिनः जीवाः इत्युक्तम् ॥ मायायाः नानात्वं नोक्तम् । तथा च ईश्वरनानात्वस्य असंभवः श्रुत्यर्थस्य न विरोधः ॥

अध्यासभाष्योक्ताविद्या मुख्यैवेति मया प्रतिपादितम् । पुनः अविद्याकल्पितायाः मायायाः मुख्यत्वं भवद्भिरुच्यते ॥ अविद्या-कल्पितस्य मुख्यत्वं कथं संभवति ? नैव सम्भवति । अनादिवस्तुभूता माया प्रस्थानत्रयभाष्ये कुत्रापि नोक्ता । सा कथं मुख्या भवेत् ?

अध्यासरूपाविद्या न कार्या । अनादिभूता, तस्मात् तस्य उपादानकारणं नैव विद्यते । 'अविद्याकल्पिता माया' इत्यर्थकानि भाष्यवाक्यानि मया उदाहृतानि स्मर्तव्यानि ॥

'अविद्या माया एका' इति भाष्ये कुत्रापि नोक्ता । अविद्या अनुभवरूपाध्यासरूपा अन्तःकरणवृत्तिः न जगदन्तर्गतजीवान्तःकरण-वृत्तिः । अध्यासकल्पिता माया = जगद्बीजभूता, वस्तुभूता । कथं तयोरैक्यं संभवेत् ? मायाया: अविद्याकल्पितत्वबोधकवाक्यानि मया उदाहृतानि । भवद्भिरपि अत्र विद्यन्मा इत्युक्तम् । अध्यस्मायाः अनादित्वं कथम् ? भाष्यवाक्यान्येव प्रमाणं व्याख्यानोपव्याख्यान-वाक्यानि भाष्यविरुद्धानि न प्रमाणभूतानि इत्येतन्न विस्तर्तव्यम् ॥

७) या न विद्यते वस्तुनः सा माया तत्स्वरूपमज्ञानं तदेव मूलप्रकृतिः गुणसाम्यं अविद्याचनेकाकारा जगदाकारेण परिणता (सर्वसार-उ) इति श्रूयते । अत्र या न विद्यते इत्यनेन (ब्रह्माध्यस्त) प्रकृतेरेव परिणामात् न सांख्यवादावकाशः । अस्यां तु श्रुतौ माया-विद्यापदानां स्वरसतः सामानाधिकरण्यात् (?) प्रथमभाष्यपंक्तौ अन्तः-करणादिषु प्रयुक्तमविद्यापदं गौणमेवेति विज्ञायते ॥

## विमर्शनम्

या भाष्यकारैः व्याख्याता दशोपनिषदः ता एव अस्माकं प्रमाणीभूताः । नान्योपनिषदः अविद्याकल्पिता माया । अविद्या = अध्यासरूपा । अविद्या = मिथ्याज्ञानस्वरूपा अनुभवरूपा अन्तःकरण-वृत्तिः ।

(गी. भा. २-२१) बुद्धिवृत्त्यविवेकविज्ञानेन अविद्यया इति अविवेकरूपा बुद्धिवृत्तिरविद्येत्युक्तम् ॥

(सू. भा. अध्यासभाष्य) अध्यासो नाम अतस्मिन् तद्बुद्धिः इत्युक्तम् ॥

भवद्भिरुच्यमाना माया तु जगद्बीजभूता अनिर्वचनीयवस्तुभूता अध्यासरूपाविद्या = मिथ्याज्ञानरूपा । उभयोः ऐक्यं कथं सिद्ध्यति ? नैव ऐक्यं भवति । भाष्यकारैः अनुक्तायाः अनादिमायायाः मुख्यत्वं मुख्यत्वेन उक्तायाः अध्यासरूपाविद्यायाः गौणत्वं नैव युज्यते । प्रस्थानत्रयभाष्ये कुत्रापि न अविद्यामायापदयोः सामानाधिकरण्यमुक्तम् ।

भवद्भिरेव या न विद्यते वस्तुतः सा माया इति पूर्वस्मिन् आक्षेपे उक्तम् ॥ अविद्यमाना कथम् अनादिमूला भवेत् ?

८) किञ्च सच्छब्दवाच्यमविद्याशबलं ब्रह्म । ब्रह्मणोऽव्यक्तम् । अव्यक्तात् महान् । महतोऽहंकारः (त्रिशिखि ब्रा. उ.) इति यावत् परमहंसनित्यानुष्ठानात्मकचित्समाधिलक्षणभगवत्पादानुगृहीतप्रणवपञ्चीकरणश्रुतौ अव्यक्तपदं तु सर्वविक्षेपकारणीभूतमूलाविद्याया एव महत्तत्त्वप्रसवप्राक्क्षणापेक्षया मायाम् ॥ अतः नोक्तवक्ष्यमाणश्रुतिजातगताव्यक्ताविद्यापदस्य च सामानाधिकरण्यविरोधः । तथाच

अत्र कारणत्वं आवरणात्मकाविद्यायाः स्पष्टमेव । कार्यत्वं च महच्छब्दवाच्यसमष्टिहैरण्यगर्भतत्त्वद्वारा अन्तःकरणस्येति हेतोरपि प्रथमभाष्यपंक्तिगताविद्यापदं अन्तःकरणे गौणमेवेति सिद्धम् ॥

## विमर्शनम्

भवद्भिरुदाहृतपञ्चीकरणश्रुतौ अव्यक्तस्य ब्रह्मजन्यत्वमुक्तम् । अनादित्वं गतम् । अध्यासकल्पितं अव्यक्तं मयाप्यङ्गीकृतम् । भाष्यकारैरनुक्ताया अनाद्यनिर्वचनीयवस्तुभूतायाः मूलाविद्यायाः मुख्याविद्यात्वं, भाष्यकारैः तत्तत्रयोक्ताध्यासस्य गौणाविद्यात्वं मूढोऽपि नाङ्गीकरोति किं पुनर्भवादृशाः ! भवद्भिरेव अव्यक्तस्य चिदध्यस्तत्वम् अंगीकृतम् । अध्यासकल्पिता माया भाष्यकारैरंगीकृता मयाप्युक्ता सा अविद्या न भवति । भवद्भिरुच्यमाना मूलाविद्या अनाद्यनिर्वचनीयवस्तुभूता अध्यासकारणीभूता, मया उच्यमाना अध्यासकल्पिता माया । अतः उभयोः ऐक्यं कथं सङ्गच्छते !

अविद्यायाः कारणत्वं जीवान्तःकरणस्य कार्यत्वं मयाप्यङ्गीकृतम् । जीवान्तःकरणवृत्तिजन्या मायेति मया नोक्तम् । अनुभवरूपाध्यासकल्पिता माया इत्युक्तम् ।

न केवला माया अध्यासकल्पिता किन्तु सर्वं जगत् अध्यासकल्पितम् ॥ (गी. भा. १३–२६) इति गीताभाष्ये भाष्यकारैरेव उक्तम् ॥

९) इत्थं स्थूलसूक्ष्मकारणात्मकव्यष्टिसमष्टिस्वरूपजीवेश्वरद्वयोपाधित्रयस्यापि चिदध्यस्तत्वाद्वाचारंभणत्वेन तद्वाचकाकारोकारमकारमात्रात्रयमात्रत्वेन प्रोक्तेऽध्यारोपके विश्वविराजोस्तैजसहिरण्यगर्भयोरेवा-

पंक्षिक एव भेदः प्राज्ञसूत्रात्मनोरप्यविद्यामायोपाधिकयोरपि न वस्तुतः (भेदः) इति सिद्धे मायाविद्ययोरेकत्वेन व्यष्टिसमष्ट्यात्मकतैजससूत्रात्मनोः सौपुप्ताक्षरगन्तकावरणकार्यत्वमुक्त्वा ॥

१०) स्थूलसूक्ष्मकमात्सर्वं चिदात्मनि विलापयेत् ( प्र. पं. या. ४८ ) इति सूक्ष्मशब्दशब्दितस्यान्तःकरणस्य स्वकारणीभूतावरणात्मनि प्रविलापः प्रोक्तः । अक्षरत्वक्षरं निरुक्तमायैव । (चिदध्यस्ता)

११) "कूटस्थोऽक्षर उच्यते" ( भ. गी. १५–१६ ) इति स्मृतेः तथा च अन्तःकरणस्य मायाजन्यत्वे सिद्धेऽपि तद्व्युत्क्रमेण अन्तःकरणवृत्तिजन्या मायेत्युक्तिः अयुक्तैवेति सिद्धम् ॥

## विमर्शनम्

भाष्यकारैरेवअविद्याकल्पिता माया इत्युक्तम् । मया जगद्-घटकजीवान्तःकरणवृत्तिजन्या माया इति नोक्तम् । (भ.गी.१३–२५) भगवतैव क्षेत्रक्षेत्रज्ञसंयोगरूपाध्यासादेव सर्वं संजायते इत्युक्तम् ॥ मयापि सर्वानुभवसिद्धाध्यासरूपान्तःकरणवृत्तिजन्या माया इत्युक्तम् । अध्यासं विना 'इयं माये'ति वक्तुमपि न शक्यते । भवद्भिरपि चिदध्यस्ता मायेत्युक्तम् । जगदुत्पत्तिकारणभूताध्यासरूपान्तःकरणवृत्तिजन्या जगद्-घटकजीवान्तःकरणवृत्तिजन्या नोचेत् अध्यासरूपान्तःकरणवृत्तिजन्यं व्यक्ताव्यक्तात्मकं जगदिति भगवदुक्तिः कथं सङ्गच्छते ! भवद्भिरेव चिदध्यस्ता मायेत्युक्तम् । अनादित्वं गतं, अध्यासकल्पितत्वं प्राप्तम् ।

१२) बुद्धेरात्मा महान् परः महतः परमव्यक्तम् (क.३-१०) इति महत्तत्त्वद्वारा बुद्धिरूपान्तःकरणस्य अव्यक्तशब्दशब्दितमायाकार्यत्वं शोध्यते तत्र शङ्करभाष्ये ॥

१३) बुद्धिशब्दवाच्यं अध्यवसायाद्यारम्भकं भूतसूक्ष्मम् । बुद्धेरात्मा सर्वप्राणिबुद्धीनां प्रत्यगात्मभूतत्वात् आत्मा महान् सर्वमहत्वात् । अव्यक्ताद्यत्प्रथमं जातं हैरण्यगर्भं तत्त्वं बोधाबोधात्मकं महान् आत्मा बुद्धेः परः इत्युच्यते । महतोऽपि परं सूक्ष्मतरं प्रत्यगात्मभूतं सर्वमहत्तरं च अव्यक्तं सर्वस्य जगतो बीजभूतं अव्याकृतनामरूपसतत्त्वं सर्वकार्यकारणशक्तिसमाहाररूपं अव्यक्ताव्याकृतादिनामवाच्यं परमात्मनि ओतप्रोतभावेन समाश्रितं वटकणिकायामिव वटवृक्षशक्तिः इत्यस्ति । तत्र आनन्दगिरीये

१४) 'तद्धेदं तर्ह्यव्याकृतमासीत्' 'एतस्मिन्नु खल्वक्षरे आकाश ओतश्च प्रोतश्च' 'मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्' इत्यादिश्रुतिप्रसिद्धं च अव्यक्तम् । तस्य सांख्यादिमतप्रधानाद्वैलक्षण्यं आह परमात्मनीति । एवंविधकठश्रुतिभाष्यतद्व्याख्यानैः बुद्धिशब्दितान्तःकरणस्य अव्यक्तशब्दितमायाकार्यत्वनिर्णये सति अन्तःकरण वृत्तिकार्यं मायेत्युक्तिः अयुक्तेति सिद्धम् ॥ एवमेव

१५) 'महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च' भ.गी.१३-८

१६) अत्र शाङ्करभाष्ये

१७) अव्यक्तं प्रजापतेस्स्वापावस्था (भ.गी. ८–१८ भाष्ये) इत्युक्त्यनन्तरं (भूतानि:)

१८) पूर्वोक्तान् भूतग्रामबीजभूतान् अविद्यालक्षणादव्यक्तात् (भ. गी. ४–२० भाष्ये) इत्यादि भगवद्गीताभाष्यपंक्तिभिः निखिल-बीजभूताव्यक्तमेवाविद्येति मूलाविद्या स्फुटीभवति । नात्राविद्यापदं गौणमिति प्रकरणाभिज्ञः कोऽपि प्रतिवक्ति । पूर्वोक्तसर्वसारश्रुतौ मायाविद्याव्यक्तादिपदानां स्वारसिकसामानाधिकरण्यस्याप्रत्यूह्यत्वादनेन मूलाविद्या सिद्ध्यति तत्कार्यभूतनिखिलभूतग्रामघटकस्यान्तःकरणवृत्ते-अविद्यात्मकतायाजनकत्वाभावोऽपि सिद्ध्यति ॥

## विमर्शनम्

भाष्यकारैः अविद्यामायाशब्दयोः सामानाधिकरण्यं कुत्रापि नोक्तम् । भाष्यकाराः अध्यासं अविद्यामाहुः । अविद्याकल्पितां प्रपञ्चबीजभूतां मायां आहुः । भाष्यकारोक्तिरेव प्रमाणं तद्विरुद्ध-वाक्यानां प्रामाण्यं नाङ्गीकुर्मः ॥

माया अव्यक्तं प्रकृतिः अक्षरं इत्यादिपदैरुक्ता जगद्बीजभूता अध्यासरूपाविद्याकल्पिता । अविद्याकल्पिता माया जगदुपादान-कारणं इति भाष्यकारैरेव उक्तम् । अव्यक्तमेव अविद्या इति भवतां निर्णयः भाष्यविरुद्धः ॥ ( भगवद्गीताभाष्ये ८ – २० )

अविद्यालक्षणात् अव्यक्तात् इति वर्तते । अविद्यालक्षणादित्यस्य अविद्याकल्पितादित्यर्थः ॥

(१) अविद्याकल्पिते नामरूपे ............ माया

सू. भा. २-१-१४

(२) अविद्याकल्पितेन ............ व्याकृताव्याकृतात्मकेन

सू. भा. २-१-२७

(३) अविद्याकल्पितरूपभेदोपन्यासेन

सू. भा. २-१-३१

(४) रूपद्वयं ब्रह्मणि कल्पितं परामृशति

सू. भा. ३-२-२२

एषु वाक्येषु नामरूपात्मकमायायाः अविद्याकल्पितत्वं स्पष्टं भाष्यकारैः उक्तम् । अविद्याकल्पितमायायाः जगदुपादानकारणत्वमपि भाष्यकारैः एव उक्तम् । मायायाः अध्यासकल्पितत्वं उक्तम् । न जगद्घटित-जीवान्तःकरणवृत्तिजन्यत्वं उक्तम् । किञ्च अध्यासं विना मायैव न सिध्यति । अध्यस्तपुरस्य 'एव इयं माया' इति वर्तते । अध्यासं पुरस्कृत्यैव सर्वे व्यवहाराः । तस्मात् अविद्या माया एका न भवति । एकैव इति तु भ्रान्तिरेव । न केवलं माया अध्यासकल्पिता सर्वमपि जगत् अध्यासरूपाविद्याकल्पितमेव ॥

( भ. गी. भा. १३-२६ )

१९) जीवेशावाभासेन करोति माया च अविद्या च स्वयमेव भवति (बृह.ता.उ.) अनया श्रुत्या मायाविद्यापदवाच्ययोः स्वातिरिक्तकारणाभावे निश्चितेऽपि अविद्या नाम अन्तःकरणवृत्तिरेव, तत्कार्यभूता मायेति च शास्त्रिणां मायायाः कार्यत्वोक्तिरेव श्रुतिविरुद्धा ॥

## विमर्शनम्

भाष्यवाक्यविरुद्धाः दशोपनिषद्भिन्नोपनिषदः न प्रमाणभूताः । भाष्यकारैरेव मायायाः अविद्याकल्पितत्वमुक्तम् । तद्विरुद्धतया मायायाः अनादित्वोक्तिः । भाष्यविरुद्धेति न भाषते । अविद्याकल्पितमायायाः अध्यासकारणोक्तिश्च अविद्यासामानाधिकरण्यं च नैव सङ्गच्छते । अविद्यायाः बुद्धिवृत्तित्वप्रतिपादकं वाक्यम्--

बुद्धिवृत्त्या अविवेकविज्ञानेन- अविद्यया ··············· इति ।

गी. भा. २-२१

२०) अपि च

अविद्यात्मिका हि बीजशक्तिः अव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुषुप्तिः ( सू. भा. १-४-३ ) इत्यादासु सूत्रभाष्योक्तिषु मायाविद्ययोः अव्यक्तत्वेन निखिलस्थूलसूक्ष्मप्रपञ्चकारणत्वं सुस्पष्टमेव । एवमेव परश्शतमुदाहरणानि सन्ति कालहरणभिया तान्युपेक्षितानि ॥

विज्ञानिनामेकेनैवालम् हि ॥

एतावता विविधप्रमाणप्रदर्शितैः मायाविद्याव्यक्तप्रकृत्यादिपदैः व्युत्पत्तिभेदेन एक एव सम्यग्दर्शनमात्रनिवर्त्यवस्त्वाभासः व्यवह्रियत इति सुविदितं भवति ॥

व्युत्पत्तयस्तु

| | |
|---|---|
| स्वाश्रयं प्रत्यावरकत्वात् — | अविद्या इति |
| विचित्रजगत्कल्पकत्वात् — | माया इति |
| विविधविकृतिहेतुत्वात् – – | प्रकृतिरिति |
| विविधविकृतिप्रकृतिहेतुत्वात् – – | मूलप्रकृतिरिति |
| सम्यग्ज्ञानापनोद्यत्वात् — | अज्ञानमिति |
| व्यक्तप्रपञ्चपूर्वरूपत्वात् — | अव्यक्तमिति |
| व्यष्टिजाग्रत्स्वप्नहेतुत्वात् — | सुप्तिरिति |
| समष्टिजाग्रत्स्वप्नहेतुत्वात् — | महासुप्तिरिति |
| त्रिगुणवैषम्यरहितत्वात् — | गुणसाम्यमिति |
| क्षरात्मकस्थूलसूक्ष्मचेतनाचेतनहेतुत्वात् — | अक्षरमिति |
| भूताकाशवत् सर्वजगत्प्रकाशहेतुत्वात् – – | आकाश इति हि |

विज्ञायते । किञ्च

माण्डूक्यश्रुतितत्कारिकातद्भाष्यादिपर्यालोचनेऽपि आवरणात्मककारणशरीरोपाधिजन्यत्वम् एव स्थूलसूक्ष्मकार्यशरीरयोः इति विज्ञायते । ननु सूक्ष्मशरीरान्तर्गतान्तःकरणवृत्त्या कारणशरीरोत्पत्तिः, इति ॥

## विमर्शनम्

अविद्यात्मिका बीजशक्तिः अव्यक्तशब्दनिर्देश्या । सू.भा.२-१-१४, २-१-१७, २-१-३१, ३-२-२२ एषु स्थलेषु अव्यक्तस्य अविद्याकल्पितत्वोक्तेः अत्रापि अविद्यात्मिका इत्यस्य अविद्याकल्पिता इत्येवार्थः । अव्यक्तस्य अविद्याकल्पितत्वात् अविद्याव्यक्तयोर्भेद एव, न तु तयोः ऐक्यं संभवति ।

अविद्या = मानसिका, मिथ्याज्ञानात्मिका । अव्यक्तन्तु = अविद्याकल्पितानिर्वचनीयवस्तुरूपः । कथं तयोः ऐक्यं संभवति ?

भवद्भिः एतावत्पर्यन्तं अविद्यामाययोरेकत्वप्रतिपादकं एकमपि भाष्यप्रमाणवाक्यं न दत्तम् । परश्शतं वर्तते इति घोष्यते । केवलपरश्शतं वर्तते इति घोषणेन किं प्रयोजनम् ? भाष्यविरुद्धा दशोपनिषद्भिन्ना श्रुतिः न प्रमाणम् ।

२१) सोऽयमात्मा चतुष्पात् । ( मां. उ. २ )

२२) वस्तु वा भवतु, वस्त्वाभासो वा भवतु, ज्ञाननिवर्त्यः भवति ।

२३) कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ ।
प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिध्यतः ।
( गौ. का. १-११ )

२४) तत्त्वाप्रतिबोधरूपेण बीजात्मना अन्यथाग्रहणलक्षणेन च अनादिकालप्रवृत्तेन मायालक्षणेन ( गौ. का. १–१६ भाष्यम् ) अत्र निरुक्तमाण्डूक्यश्रुतिकारिकाभाष्ये वक्ष्यमाण ( मां. श्रु. ५ – ६ ) प्राज्ञेश्वरैकत्वं चालक्ष्य प्रणवप्रथमद्वितीयमात्रामात्रत्वेन वाचारंभणयोः व्यष्टिसमष्टिस्थूलसूक्ष्मप्रपंचोपाध्योः मकारमात्रामात्राविद्यामायोपाधि-जन्यत्वस्य स्फुटत्वादपि उकारमात्रामात्रान्तःकरणं कारणमिति मकार-मात्रमायोपाधेः कार्यत्वमित्युक्तिः सुतराम् असंगतैव ।

माण्डूक्यकारिकायां तत्त्वाग्रहणमावरणमेव, न ग्रहणाभावः ।

अत्रैवं सति ( माण्डूक्यकारिकाविवृतौ ) द्वौ स्वामिभिः ॥

२५) अत्र बीजभावो नाम तत्त्वाग्रहणम्, फलभावो नाम अन्यथाग्रहणम्, तत्त्वग्रहणाभावनिबन्धनमेव ह्यन्यथाग्रहणम् ॥ इति ।

( मां का. वि. ९९–६ )

## विमर्शनम्

अग्रहणम् = कारणम् । इत्यत्र अग्रहात्मिका मनोवृत्तिः ।

अन्यथाग्रहणम् = कार्यम् । अन्यथाग्रहणमपि मनोवृत्तिरेव ।

( मां. का. १–१६ ) अन्यथाग्रहणलक्षणेन अनादिकाल-प्रवृत्तेन मायालक्षणेन ॥ इति भाष्ये उक्तम् ।

( गीताभाष्ये १३-२६ ) अध्यासेनाव्यक्ताव्यक्तात्मकं जगत् जायते इत्युक्तम् ॥

अध्यासरूपाविद्याकल्पिता माया -- इत्यपि भाष्यकारैरुक्तम् ॥ तस्मात् भाष्यकाराभिप्रायेण मायादिसर्वं जगत् अध्यासकल्पितमेव इत्यर्थः सिद्ध्यति ॥

तत्त्वं न जानामि इत्यर्थकं पदं तत्त्वग्रहणाभावः इति पदं तत्त्वाग्रहणमिति पदं च एकार्थकमेव ।

२६) न हि वयं तत्त्वाग्रहणम् अन्यथाग्रहणरूपेण परिणमते इति तन्त्रान्तरप्रसिद्धप्रधानादिवदिति ब्रूमः । येनेत्थमाक्षेपः स्यात् तत्त्वाग्रहणमेव तु निमित्तमन्यथाग्रहणे ( मां. वि. ९९-१०० ) इति प्राज्ञस्य तत्त्वाग्रहणं नाम तत्त्वग्रहणाभाव एव कारणम् इति निर्णयः । उपष्टम्भकं चाहुरस्यार्थस्य–

२७) अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता ।
सर्पधारादिभिर्भावैस्तद्वदात्मा विकल्पितः ॥

( मां. का. २-७ )

इत्येतद्वौडपादकारिका ( मां. वि. ९९ – १०० पद्ययोः ) प्राज्ञस्य तत्त्वाग्रहणं नाम तत्त्वग्रहणाभाव एव इत्येतद्वो ॥ स्वामिनां मतमनुसृत्यैव शास्त्रिभिः :

२८) तदुपष्टम्भकत्वेन ॥ क्षेत्रज्ञं चापि मां विद्धि ( भ. गी. १३-२ ) इत्येतद्भगवद्गीताशाङ्करभाष्यशास्त्रारम्भघट्टे अविद्याया नामसत्वात् = तामसो हि प्रत्ययः । आवरणात्मकत्वात् इत्येतद्वाक्यं पूर्वभाविनं स्वव्यतिरिक्तं विहाय अविद्याविपरीतग्राहकः अग्रहणात्मको वा इत्येतावन्मात्रमुद्धृत्य तत्रत्य अग्रहणादस्य तत्त्वग्रहणाभावः इत्यर्थो वर्णितः ॥

## अंशतस्समालोचनीयम्

अत्र तावदविद्यायाः तामसत्वं आवरणात्मकं च स्फुटमुक्तं हि भाष्ये । कथमस्या अभावात्मकत्वं संभवति ? वैशेषिकनैय्यायिकानां अर्धवैनाशिकानामिव वेदान्तिनां समये अभावो नाम न कश्चन पदार्थो अंगीकृतः । कचिदभ्युपेत्यवादेन व्यवहारेऽपि न हि तस्य निरूपाख्यस्य वन्ध्यापुत्रसहोदरस्य कुत्रचित्कारणत्वं संभवतीति ।

## विमर्शनम्

अन्यथा गृह्णतः स्वप्नो निद्रातत्त्वमजानतः ।
विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते ॥ १-५ ॥

अत्र ग्रहणाभावः = विपर्यासः ।

अहं तत्त्वं न जानामि इति मनसो वृत्तिः । न अभावरूपः ।

अत एव गीताभाष्ये (१३-२६) क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबन्धनः संयोगः ॥

इति संयोगस्य= अध्यासस्य विवेकाभावः निबन्धनः = कारणम् इत्युक्तम् । तस्मादत्र अभावस्य कारणत्वं नोक्तम् । तत्त्वाग्रहणं तत्त्वग्रहणाभावः । अनयोर्भेदो नास्ति । उभयोरपि अज्ञानात्मा इत्यर्थः ।

२९) सहजं कर्म कौन्तेय (भ. गी. १८–४८) इत्येतद्गीताभाष्ये वैशेषिकमतोन्मथनमृधे स्फुटीकृतं हि तत्कथं वा तत्त्वग्रहणाभावस्य अन्यथाग्रहणकारणत्वमित्युच्यते ! स्वामिभिरशास्त्रिभिर्वेति न ज्ञायते ।

किंच

सिषाधयिषाविरहविशिष्टसिद्धेः अनुमितिं प्रति प्रतिबन्धकत्वमात्रमेव न तु तादृशसिद्ध्यभावस्य कारणत्वमङ्गीकृतं वेदान्तिभिस्तार्किकैः इव ॥

३०) सत्यामपि पुष्कलसामग्र्यां कार्यं नोत्पन्नं प्रतिबन्धवशात् इति सुप्रसिद्धस्वारसिकलोकप्रतीतेः । तस्माद्वेदान्तसिद्धान्ते अभावस्य कारणत्वोक्तिरयुक्ता ॥

एवमेव

३१) "अज्ञानेनावृतं ज्ञानम्" ( भ. गी. ५–१५ )

३२) ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः । ( भ. गी. ५–१६ ) इत्यादिस्थलेषु अज्ञानशब्दस्य अविद्यापर्यायस्य ज्ञानाभावार्थकत्वे तस्य ज्ञानं प्रत्यावरकत्वं वा ज्ञानेन नाशो वा न संभवति हि ॥

तस्मात् अविद्यायास्तामसत्वात् इत्येतद्गीताभाष्यं किं कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ । प्राज्ञः कारणबद्धस्तु ( मा. का. १-११ ) इत्येतत्पूर्वोक्तगौडपादकारिकां चानुसृत्य तामसाविद्यावृतत्वं अखण्ड-चिदात्मनः प्राज्ञत्वभावत्वं चेति तत्कार्यान्तःकरणोपाधिकत्वं तैजसादि-भावविभिन्नत्वमेवेति सरणिं प्राचीनसद्गुर्वाचार्यसंप्रतिपन्नां सरणिम् एव अनुसरन्तु शास्त्रिणः इति कामये ॥

## विमर्शनम्

तत्त्वग्रहणाभावस्य = अभावत्वं नास्ति । तत्त्वं न जानामि इत्याकारकान्तःकरणवृत्तिः भावरूपैव । अत एव (गी.भा. १३-२६) भाष्यकारैः क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावस्य अध्यासकारणत्वमुक्तम् ॥ (मा.का. १ १५) तत्त्वज्ञानाभावस्य च विपर्यासत्वमुक्तम् । अज्ञानेन= मिथ्याज्ञानेनेत्यर्थः । अत्र अभावस्य प्रसक्तिर्नास्ति । वार्तिककारैः तत्त्वग्रहणाभावस्य अज्ञातत्वमुक्तम् ॥ तत्त्वाग्रहणान्यथाग्रहणाभ्यां बद्धौ विश्वतैजसौ ॥ इत्येव वर्तते । तामसाविद्यायाः प्रसक्तिर्नास्ति । तामसोऽहिप्रत्ययः इति वर्तते । मूलाविद्या तामसप्रत्ययरूपा इति अंगीक्रियते किम् !

३२) अनादिमायाप्रकृत्यादिपर्यायभूतमूलाविद्यायाः परिणामात्मक एव स्थूलसूक्ष्मप्रपञ्च इत्यङ्गीकारे सांख्यमतप्रसंगो भवेदिति न भेतव्यम् । तेषां प्रकृतेस्स्वतन्त्रत्वात्सत्यत्वाच्च अस्माकं अस्वातन्त्र्यात् असत्यत्वाच्च साङ्कर्यम् ॥ अत एव

## विमर्शनम्

अनादिमाया इति, ब्रह्माध्यस्ता माया इति भवद्भिरेव अत्रैव उच्यते । तत्कथं संगच्छते ? अनादित्वे अध्यस्तत्वं न भवति, अध्यस्तत्वे अनादित्वं न भवति ॥ 'ब्रह्माध्यस्तत्वात्' इत्येकं पदं एतावत्पर्यन्तं मूलाविद्यारक्षणार्थं कृतप्रयत्नं निरर्थकमकरोत् । अध्यस्तं नाम अध्यासकल्पितमित्यर्थः । अध्यासकल्पिताया मूलाविद्यायाः अनादित्वं न संभवति ॥ ( १३-२६ ) गीताभाष्योक्ताध्यास एव सर्वजगदुत्पत्तिकारणं इत्ययं सिद्धान्तः भवद्भिरप्यंगीकृत इत्यभूत् । प्रकृतेरनध्यस्तत्वे ज्ञानबाध्यत्वासंभवात् द्वैतापत्तिः दुर्निवार्या । किञ्च मूलाविद्यायाः अध्यासोपादानकारणत्वेनाङ्गीकारात् अध्यस्तत्वं नैव संभवति ॥ अध्यस्तत्वाभावे ज्ञानबाध्यत्वं न संभवति । द्वैतापत्तिः दुर्निवार्या । सुष्टुः पूर्वं आत्मैकत्वप्रतिपादकश्रुतीनां विरोधश्च अपरिहार्यो भवति ॥

३३) निरूपितेऽस्मिन्परिणामवादे स्वयं समायाति विवर्तवादः इति विवरणोक्तिरपि साधु संगच्छते ॥

## विमर्शनम्

मूलाविद्यावादः सर्वथा त्यक्तः (भाष्यबहिष्कृतः) । एवमेव विवर्तवादोऽपि इति ज्ञेयः । ब्रह्मणः निरवयवत्वात् निर्विकारित्वाच्च ॥

३४) सम्यग्दर्शनस्य सफलत्वनिरूपणावसरे शाङ्करबृहदारण्यकभाष्ये ( बृ. ३-३-२ ) भिद्यते हृदयग्रन्थिरिति फलश्रवणात् संसारबीजाविद्यादिदोषनिवृत्तिदर्शनाच्च हृदयग्रन्थिभेदफलात् पृथगविद्यानिवृत्तिफलवर्णनेन हृदयग्रन्थ्यविद्ययोः पार्थक्यस्य स्फुटत्वात् हृदयग्रन्थ्यात्मकान्तःकरणवृत्तिरेव अविद्या न तदतिरिक्तेत्ययुक्तम् ॥

## विमर्शनम्

हृदयग्रन्थ्यविद्ययोः पार्थक्यं वा भवतु एकत्वं वा भवतु हृदयग्रन्थ्यात्मकान्तःकरणवृत्तिरेव अविद्या नान्येति वचनं दुष्कमेवेति पूर्वमेव प्रतिपादितम् ।

३४) आसेतुहिमाचलपर्यन्तं श्रीशाङ्कराद्वैतानुयायिप्रामाणिकप्रबन्धकर्तृत्वेन संप्रतिपन्नानां भामती, कल्पतरु, परिमल, पंचपादिका, विवरण, तात्पर्यदीपिकादिग्रन्थकर्तॄणां आनन्दगिरि, रत्नप्रभा, सिद्धिचतुष्टयकर्तॄणां संक्षेपशारीरक, खण्डनकारादीनां पञ्चदशी, जीवन्मुक्तिविवेक, अनुभूतिप्रकाश, सर्वदर्शनसंग्रह, विवरणप्रमेयसंग्रह, चतुर्वेदभाष्यप्रणेतॄणां विद्यारण्यचरणानां श्रीधरनीलकंठाचार्यादीनामपि सर्वेषां मूलाविद्याविषये भ्रान्तिकल्पनापेक्षया एकस्यापि पूर्वाचार्यस्य हो॥ ना॥ स्वामिमतोपष्टम्भकग्रन्थस्य अभावात्

३५) बहुनुग्रहन्यायेन

३६) शुक्नविकान्यायेन च हो॥ ना॥ स्वामिन एव भ्रान्ताः इत्ययमर्थ एव न्यायसिद्धो भवति ।

वस्तुतस्तु

असंङ्गे चिदात्मनि अनादित्वेन मायायाः सादित्वेन सूर्यचन्द्रादेः क्षणिकत्वेन निश्वासादेः क्षीरपरिणामत्वेन दध्यादेः इष्टकाधारब्धत्वेन सौधादेः स्वप्ने इव जागरेऽपि भानमात्रमेव अस्माभिराक्रियते । वस्तुतः भानदशायामपि न तेषां स्वातन्त्र्येण वस्तुत्वम् । अलातऋजुवक्रादिरेखानामिवेति श्रीमतां नाविदितं खलु

अत एव

३७) अद्वयं च द्वयाभासम् । (गौ. का. ३-३०)

३८) एक एव त्रिधा स्मृतः । (गौ. का. १-१)

३९) यत्र हि द्वैतमिव भवति बृ. ४-४-१४)

३९) इत्यादिप्रमाणमूला

४०) अविद्यासहकार्येण नासीदस्ति भविष्यति ।

(बृ. सं. वा. १८३)

४१) मूलकारणमेवान्त्यात्कार्यात्तेनतेन कार्याकारेण नटवत्सर्वव्यवहारास्पदत्वं प्रतिपद्यते ॥ ब्र. सू. भा. २-१-१८ इत्येतदारम्भणाधिकरणशाङ्करभाष्यसूक्तिमनुसृत्य सर्वेऽपि निर्विवादाः स्वस्था भवेम ॥

किञ्च

श्रीविठ्ठलशास्त्रिणामप्ययं होलीवादः । हेलामात्रो न विवादार्थ एव यतः श्रीविठ्ठलशास्त्रिणः वेदान्तशिरोमणिपरीक्षायां मूलाविद्या-

सिद्धान्तानुयायिभामतीविवरणाद्वैतसिद्ध्यादिग्रन्थानेव तत्सिद्धान्तानुयायिगुरुवर्येभ्यः अधिगतत्वेन अस्मत्समानयोगक्षेमा अपि श्री रो॥ ना॥ स्वामिपक्षं विनोदादभ्युपेत्य तन्मतं प्रकाशयन्तीति मूलाविद्यातत्त्वं जानन्त्येवेति विश्वसिमः ।

एतदेव मम सर्वदा समालोचनम् ॥

इत्थं

विबुधविधेयो

भवदीयः

मुदुगोंड वेङ्कटरामशास्त्री

1-1-1976

त्रिलिङ्गमहाविद्यापीठम्

विजयवाड-२

Pin. 520002

## विमर्शनम्

वे. ब्र. श्री मुदुगोंड वेङ्कटरामशास्त्रिणः महाविद्वांसः, ब्रह्मविद्यालङ्कारः, वेदान्तविशारदः, महोपाध्याय इत्याद्युपाधिधारिणः विद्याविनयसंपन्नाः एतानहं प्रार्थयामि ॥

अन्ते (४०) भवद्भिः यदुक्तम्,

अविद्यासहकार्येण नासीदस्ति भविष्यति इति ।

तत्तथा यया प्रक्रियया भवेत् तथा सा प्रक्रिया अनुसर्तव्या ।

माया अनाद्यनिर्वचनीयवस्तुभूता इत्यङ्गीकारे नासीत् नास्ति न भविष्यति इत्यङ्गीकर्तुं कथं शक्यते ? अतः अध्यासरूपाविद्याकल्पिते-त्यङ्गीकारे नासीत् नास्ति न भविष्यतीत्यङ्गीकर्तुं शक्यते । अध्यस्तस्य अवस्तुत्वात् । भवद्भ्यः यन्नोचते भवद्भिः यन्याय्यमिति ज्ञायते तदेव अनुसर्तव्यमिति निवेदयामि ।

स्वप्ने इव जागरेऽपि भानमात्रमेव अस्माभिरङ्गीक्रियते इति श्रीमतां उक्तिः यथार्थभूता भवतु । मूलाविद्याङ्गीकारे भानमात्रमिति अंगीकर्तुं न शक्यते ।

अहं मद्रास् मैलापूर् संस्कृतप्रौढशालायां वेदान्ताभ्यासम् अकरवम् । १९१७ संवत्सरे शिरोमणिपरीक्षायां उत्तीर्णः ॥

वे. ब्र. श्री. चन्द्रशेखरशास्त्रिणः
,, पञ्चापगेशशास्त्रिणः
,, पद्मनाभशास्त्रिणः
,, श्रीनिवासशास्त्रिणः

इत्यादयः मम गुरवः ।

मूलाविद्याप्रक्रियामनुसृत्यैव ते उपदिदिशुः । बेंगळूरनगरं प्रत्यागमनानन्तरं श्री डा॥ ना॥ स्वामिनः श्री के. ए. कृष्णस्वाम्यय्यर् महाशयाश्च अध्यासप्रक्रियैव भाष्यकारोक्तप्रक्रिया, अनया प्रक्रिययैव अद्वैतं सिद्ध्यति, नान्यथेति मां ग्राहयामासुः ॥

अहमपि प्रस्थानत्रयभाष्यं पञ्चवारं शिष्येभ्योऽपदिदेश । प्रस्थानत्रयभाष्यं आलोच्य इदानीं अध्यासप्रक्रियैव भाष्यकारोक्तप्रक्रियेति अद्वैतप्रतिपादिकेति च दृढं विश्वसिमि । अतः सावधानेन सम्यग्विमृश्य भवन्तोऽपि इमां अध्यासप्रक्रियाम् अनुसृत्य अनुभवावसानं ज्ञानं लब्ध्वा श्रेयोभागिनो भूयासुरिति नारायणस्मरणम् करोमि ॥

बेंगळूर ज्ञानानन्देन्द्रसरस्वती स्वामी
१४-९-१९८१

अध्यासप्रक्रियानुरोधिनः बहवः विद्यन्ते ।

१) श्री गौडपादाः

२) श्री शङ्कराचार्याः

३) श्री सुरेश्वराचार्याः

४) श्री अनन्तमूर्तिशास्त्रिणः

५) श्री नरसिंहमूर्तिशास्त्रिणः

६) श्री फ. जि. सुब्रायशर्माणः

७) श्री वि. श्रीनिवासभट्टाः

८) श्री ज्ञानानन्देन्द्रसरस्वतीस्वामिनः

९) श्री सच्चिदानन्देन्द्रसरस्वतीस्वामिनः

१०) श्री के. ए. कृष्णस्वाम्यय्यर् महाशयाः

एते सर्वे भाष्योक्ताध्यासप्रक्रियानुसारिणः । भवदुक्तास्सर्वेऽपि न भाष्यानुरोधिनः किन्तु व्याख्यानानुरोधिनः । ते बहवः सन्तु, किम् प्रयोजनम् ? अस्मदीयानां एतेषां पुस्तकानि बहूनि सन्ति ।

श्रीमद्भिः विद्यालङ्कारः, वेदान्तविशारदः, महोपाध्यायः इत्याद्युपाधिधारिभिः ब्र॥ श्री॥ मुदुगोंड वेङ्कटरामशास्त्रिभिः 'मूलाविद्या भाष्यवार्तिकविरुद्धेत्याख्यग्रन्थसमालोचनेनारोपिता दोषास्तेषां विमर्शनं च ब्रह्मजिज्ञासूनाम् उपकारकानि भवेयुरिति मत्वा अस्मिन्नल्पपुस्तके संयोजयामि ॥

तदानीं तेभ्यः प्रहितं विमर्शनं मन्निकटे नास्ति । अतः नूतनविमर्शनमिदानीं मया कृतम् ॥ मुद्रापितं च ॥

विद्यालङ्कारः, वेदान्तविशारदः, महोपाध्यायः इत्याद्युपाधि-धारिणः, गुरुकुलभारतीनिलयसंस्थापकाः, त्रिलिङ्गविद्यापीठस्य अध्यक्षाः, भो: वे॥ ब्र॥ श्री मुदुगोंड वेङ्कटरामशास्त्रिणः

गृहस्थाश्रमस्थविठ्ठलशास्त्री, इदानीं तुरीयाश्रमस्थज्ञानानन्देन्द्र-सरस्वतीस्वामी भवच्छ्रेयसे नारायणस्मरणं करोमि ।

नवतिवर्षवयस्कस्य विरक्तस्य संन्यासिनः मम वादेच्छा कथं संभवेत् ? न हि संभवति । मुमुक्षवः व्याख्यातृभिरुक्तां भाष्यकारैः अनुक्तां मूलाविद्याप्रक्रियामनुसृत्य मुक्तिमार्गाद् भ्रष्टा न भवेयुः । भाष्यकारैरुक्ताध्यासप्रक्रियामनुसृत्य लब्धानुभवावसानज्ञाना. जीवन्मुक्ता भवेयुरिति मत्वा, 'मूलाविद्या भाष्यवार्तिकसंमता' इत्याख्यग्रन्थस्य उत्तरत्वेन च 'मूलाविद्या भाष्यवार्तिकविरुद्धे'ति प्रसिद्धो ग्रन्थः मया प्रकटीकृतः ॥

भवन्तोऽपि महाविद्वांसः, व्यवहारे कीर्तिमन्तः । इदानीं भवन्तः भाष्यकारोक्ताध्यासप्रक्रियावैशिष्ट्यं ज्ञात्वा श्रीमतामेवानुभवे आत्मानात्मनोरितरेतराध्यासं विना यत्किमपि एकमक्षरमपि वक्तुं न शक्यते इति मत्वा भाष्यकारैरुक्ताध्यासप्रक्रियैव भाष्योक्ता प्रक्रिया; मूलाविद्याप्रक्रिया असाध्वी प्रक्रियेति ज्ञात्वा तां त्यक्त्वा अध्यास-प्रक्रियामाश्रित्य अनुभवपर्यन्तं ज्ञानं लब्ध्वा जीवन्मुक्ता भूयासुरिति नारायणस्मरणं करोमि ॥

–श्री ज्ञानानन्देन्द्रसरस्वती स्वामी

# शुद्धाशुद्धपत्रिका

| पुटः | पंक्तिः | अशुद्धः | शुद्धः |
|---|---|---|---|
| ६ | १०. | आचार्यास्तु | आचार्यास्तु |
| ७ | ८ | देहाध्यासेन | देहाध्यासेन |
| ८ | १२ | तत्त्वज्ञानं | तत्त्वाज्ञानं |
| ११ | २ | सर्वसद्धिकारणं | सर्वसिद्धिकारणं |
| ११ | ३ | सर्वसद्धिकारणं | सर्वसिद्धिकारणं |
| १२ | ७ | सम्यग्ज्ञने | सम्यग्ज्ञाने |
| १४ | १६ | अविद्यकल्पितम् | अविद्याकल्पितम् |
| १५ | ३ | यथासम्भम्व | यथासम्भवम् |
| १७ | ५ | भवति अत्र | भवत्यत्र |
| १७ | १२ | निविकरि | निर्विकारि |
| २० | १९ | जाग्रत्वेन | जाग्रत्त्वेन |
| २० | १९ | तास्ति | नास्ति |
| २१ | १२ | तद्वितीय | तद्द्वितीय |
| २२ | १२ | नदेत् | वदेत् |
| २३ | ३ | तदात्मधर्मौ | आत्मधर्मौ |
| २३ | १३ | अना | अन्या |
| २४ | ६ | र्तते | वर्तते |
| २४ | ६ | निविकल्पक | निर्विकल्पक |

| पृट: | पंक्ति: | अशुद्ध: | शुद्ध: |
|---|---|---|---|
| २५ | ११ | उ पाभावे | उपायभावे |
| टिप्पणि | | विनिमुक्तम् | विनिर्मुक्तम् |
| ३० | १ | श्रति | श्रुति |
| ३२ | ८ | चित् | अचित् |
| ३२ | १५ | जिवतः | जीवतः |
| ३६ | १२ | तास्ति | नास्ति |
| ३८ | ६ | अवस्यानं | अवस्थानं |
| ४३ | ११ | क्षत्रवः | क्षत्रुः |
| ४३ | १२ | तान् | तं |
| ४५ | १९ | का | क |
| ४९ | ११ | भगनान् | भगवान् |
| ५२ | २ | ज्ञानम् | ध्यानम् |
| ५५ | १५ | नितितः | निश्चितः |

## ಶ್ರೀ ಸಚ್ಚಿದಾನಂದೇಂದ್ರಸರಸ್ವತೀಸ್ವಾಮಿಗಳವರ ಇತರ ಗ್ರಂಥಗಳು

मूलाविद्या भाष्यवार्तिकविरुद्धा (संस्कृत)

ಮೂಲಾವಿದ್ಯಾ ಭಾಷ್ಯವಾರ್ತಿಕವಿರುದ್ಧಾ (ಕನ್ನಡ)

ಶ್ರೀ ಸ್ವಾಮಿ ಶಿವಾನಂದರ ಉಪದೇಶಗಳು

ಮೂಲಾವಿದ್ಯಾವಿಮರ್ಶೆ

ಪಾರ್ವಣಶ್ರಾದ್ಧತಿಥಿನಿರ್ಣಯ

Sri Shankara's Adwaita Siddhanta

ಬೋಧಾಯನ ಸಂಧ್ಯಾ

ಬೋಧಾಯನ ಪಾರ್ವಣಶ್ರಾದ್ಧಪ್ರಯೋಗಃ

शङ्करसिद्धान्तः (संस्कृत)

ಶಂಕರಸಿದ್ಧಾಂತ (ಕನ್ನಡ)